# ॥ एकादशः सर्गः ॥

॥ श्रीगणेशाय नमः ॥

तां देवतामिव मुखेन्दुवसत्प्रसादा- [-वसत्→धृत]

-मक्ष्णा रसादनिमिषेण निभालयन्तीम्।

लाभाय चेतसि धृतस्य वरस्य भीम-

-भूमीन्द्रजा तदनु राजसभां बभाज ॥१॥

तदनु पश्चात् भीमभूमीन्द्रजा दमयन्ती चेतसि धृतस्य मनसि स्थिरीकृतस्य वरस्य श्रेष्ठस्य पत्युर्नलस्य लाभाय सभां बभाज समाश्रयत्। कामिव[1] देवतामिव यथा कापि चेतसि धृतस्य वरस्य वरणीयस्य वस्तुनो लाभाय कामपि[2] देवतां भजति, भक्त्या संश्रयति। इदानीं श्लेषः-मुखान्येवेन्दवस्तेषु धृतोऽवस्थितः प्रसादः प्रसन्नता यस्यां तां तथा सर्वेषु नानाविधा नृपजना यत्र प्रसन्नवदनाः सन्तीत्यर्थः। देवतामपि धृतौ निवेशितौ मुखेन्दौ प्रसादो वरदानोद्यमसूचको नेत्रविस्फारितादिभावो[3] दयया ताम्। सभां तावद् रसाद् दर्शनस्पृहातिरेकादनिमेषेना (णा) क्षणा निभालयन्तीं पश्यन्तीम्। देवतां तु स्वभावात् निमेषरहितेनाक्ष्णा रसात् प्रीत्यतिशयात् निभालयन्तीम् ॥१॥

तन्निर्मलावयवभित्तिषु तद्विभूषारत्नेषु च प्रतिफलन्निजदेहदम्भात्।

दृष्ट्या परं न हृदयेन न केवलं तैः सर्वात्मनैव सुतनौ युवभिर्ममज्जे ॥२॥

तैर्युवभिः सुतनौ भैम्यां परं दृष्ट्या न ममज्जे, केवलं हृदयेन मनसा न ममज्जे, अपि तु सर्वात्मनैव सर्वस्वरूपेणापि ममज्जे ब्रुडितम्। कस्मात् सर्वात्मनैव ममज्जे तदाह। तस्या निर्मलेष्ववयवेष्वेव भित्तिषु। तस्या विभूषाणां कनककुण्डलादीनां रत्नेषु च प्रतिफ-[216·b]-लतां प्रतिबिम्बमानानां निजदेहानां दम्भान्निभेषा। निर्मलायां स्फाटिकमय्यादिभित्तौ निर्मलेषु च रत्नेषु पुरो वर्तमानं वस्तु प्रतिफलत्येव ॥२॥

द्यामन्तरा वसुमतीमपि गाधिजन्मा यधन्यमेव निरमास्यत नाकलोकम्।

चारु; स यादृगभविष्यदभूद्विमानैस्तादृक् तदभ्रमवलोकितुमागतानाम् ॥३॥

गाधिजन्मा विश्वामित्रः द्यां स्वर्गं वसुमतीं भुवं चान्तरां[4] मध्ये शक्रक्रोधाद् यदपरमेव नाकलोकं स्वर्गभुवनं निर्मास्यद् असृक्ष्यत्, स च नाकलोको यादृग्यादृशश्चारुमनोहरोऽभविष्यत् समपद्यत[5], तादृग् तादृशं तदभ्रमन्तरिक्षमभूत् [1. B1. त्रिलोक —

2. B1. कामिव. 3. B1 — विस्फु — 4. B1. चान्तरां, & चान्तरा 5. B1. & समपश्यत

कैः? अवलोकितुमागतानां वैमानिकानां विमानैः स्वयंवरकौतुकसमेतानां स्वर्गीयाणां विमानैर्निरन्तरं व्योम द्वितीयः स्वर्ग इवाभवदित्यर्थः ॥३॥

कुर्वद्भिरात्मभवसौरभसम्प्रदानं भूपालचक्रचलचामरमारुतौघम् (-तैन) ।
आलोकनाय दिवि संचरतां सुराणां तत्रार्चनाविधिरभूदधिवासधूपैः ॥४॥

तत्र स्वयंवरेऽधिवासधूपैः कृत्वा सुराणामन्तरिक्षे दर्शनाय इतस्ततो गच्छतामर्चनाविधिः पूजाविधानमभूत् । तत्र ह्यधिवासाय प्रथममगुर्वादिसुगन्धद्रव्यजा धूपाः समुल्लासिताः सन्ति । किं कुर्वद्भिः? भूपालानां चक्रं वृन्दं, तस्य चलानि चामराणि, तेषां मारुतेन वायुना कृत्वा आत्मभवस्य स्वोत्पन्नस्य सौरभस्य परिमलस्य सम्प्रदानं भक्तिपूर्वं निवेदनं कुर्वद्भिः । मारुतौघैरिति क्वापि पाठः ॥४॥

तत्रावनीन्द्रचयचन्दनचन्द्रलेपनेपथ्यगन्धमयगन्धवह[1]प्रवाहम् ।
आलीभिरापतदनङ्गशरानुसारी संरभ्य (-रुध्य) सौरभमगाहत भृङ्गवर्गः ॥५॥

तत्र स्वयंवरे भ्रमरसमूहः परिमलं गाहते स्म । कीदृशः? आपतन्तो ये अनङ्गशराः कुसुमानि तदनुसारी, तत्र हि निरन्तरा पुष्पवृष्टिरितस्ततः पतन्ती वर्तते । ते (ते) च साक्षादनङ्गशरास्तत्कार्यकारणात् । किं कृत्वा अगाहतेत्याह । अवनीन्द्रचयस्य राजचक्रस्य चन्दनमिश्रस्य चन्द्रस्य कर्पूरस्य यो लेपः उपदेहस्तदेव नेपथ्यं वेषस्तस्य गन्धः प्रस्तुतो यत्र एवं भूतो यो गन्धवहो मरुत् तस्य प्रवाहमोघमालीभिः श्रेणीभिः संरुध्यावगृह्य ॥५॥

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गीसर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्लुतपताकतयाभिनिन्युर्मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥६॥

मन्ये सौधस्रजः प्रासादमालाः प्लुतपताकतया फरहरायमाणध्वजपटेन कृत्वा जनेषु बहुषु लोकेषु मध्ये निजं ताण्डवपण्डित-[श्री.व]-त्वं लास्यकलाचातुरीमभिनिन्युर्ज्ञापयन्ति स्म । कीदृश्यः? । उत्तुङ्गा अत्युच्चा या मङ्गलमृदङ्गानां निनादस्य भङ्ग्यो विविधाः प्रक्रिया[2]स्तासां यः सर्वानुवादोऽशेषानुवदनं प्रतिध्वनेरनुकरणं, तेन बोधिता ज्ञापिता साध्वी पट्वी मेधा धारणावती धीर्यासां तास्तथा । न हि मेधां विना केनाप्युद्गाहितं शास्त्रं सामस्त्येनानुविहितुं शक्यते । यो हि मेधावी भवति, स एवेदृग्विधं भङ्गिशास्त्रं सर्वमनुवदति । एतेनैतत् सर्वं तत्र विजृम्भितमिति सूचितम् ॥६॥

1. B. -प्रभावम्. 2. B. प्रकृयाः

संभाषणं भगवती सदृशं विधाय वाग्देवता विनयबन्धुरकन्धराया: ।
ऊचे चतुर्दशजगज्जनतानमस्या तत्रस्तिता (तत्राश्रिता) सदसि दक्षिणपक्षमस्याः ॥७॥

भगवती चतुर्दशजगज्जनतानमस्या वाग्देवता सरस्वती, तत्र सभायां विनयेन भक्तिपेशलतया बन्धुरा उन्नतानता कन्धरा ग्रीवा यस्यास्तस्या एवंभूताया अस्या भैम्या सदृशं योग्यं संभाषणं समालापं विधाय दक्षिणपार्श्वमस्या एवाश्रिता सती ऊचे । चतुर्दशानां जगतां भुवनानां या जनता जनसमूहस्तस्य नमस्या नमस्करणीया । सदृशं संभाषणम् । आगच्छ सखि ! भगिनि, तव नृपाणां स्वरूपं निरूपयामीत्यादि । दक्षिणस्थिता मान्यत्वात् ॥७॥

अभ्यागमन्मखभुजामिह कोटिरेषा येषां पृथक्कथनमब्दशतातिपाति ।
अस्यां वृणीष्व मनसा परिभाव्य कञ्चिद्यं चित्तवृत्तिरनुधावति तावकीना ॥८॥

किं किमूचे तदाह । हे सुभगे ! एषा मखभुजां देवानां कोटिरभ्यागमत्, -गमदेषा- अभ्यागतास्ति । येषां मखभुजां पृथक्कथनं प्रत्येकवर्णनम् । अब्दानां शतमपि [अति]-पततीत्येवंशीलम् । बहुत्वादुत्तरगुणत्वाच्च ये वर्षशतैरपि वर्णयितुं न पार्यन्त इत्यर्थः । तस्मादस्यां मख-भुजां कोटौ तावकीना भवदीया चित्तवृत्तिर्यमनुधावति यं प्रति त्वरिता प्रवर्तते, तं मनसा प्रथमं सम्यक्परिभाव्य विचार्य वृणीष्व वरस्रग्विन्यासेन स्वीकुरु ॥८॥

एषां त्वदीक्षणरसादनिमेषतैषा स्वाभाविकानिमिषता मिलिता यथाभूत् ।
आस्ये तथैव तव नन्वधरोपभोगैर्मुग्धे ! विधावमृतपानमपि द्विधास्तु ॥९॥

ननु भो मुग्धे ! भैमि ! एषां देवानां एषा त्वदीक्षणरसादुद्भवल्लोकनानुरागाद्या औपाधिकी अनिमिषता निमेषरहितता सा यथा स्वाभाविकानिमिषता मिलिता सती द्विधाभूत्सम्पन्ना । तथाविधौ विषये यत् स्वाभाविकममृतपानं तदपि द्विधास्तु । कैः ? तवाधरस्योपभोगैः पानैः । यथैव विधावमृतं तथैव [217. b] तवाधरेऽस्ति वरणानन्तरं चैतत्सुघटम् । स्वाभाविकी चासावनिमिषता च तया मलिता सङ्गता ॥९॥

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन यः पट्टसूत्रपरिरम्भणशोणशोभिः ।
यज्ञोपवीतपदवीं भजते स शम्भोः सेवासु वासुकिरयं प्रथितः सितश्रीः ॥१०॥

देवप्रसङ्गेन भुजङ्गेन (श)मपि वर्णयति । हे भैमि ! सोऽयं सितश्रीर्धवलकान्तिः प्रथितवि (-तो वि-) ख्यातो वासुकिर्नाम भुजङ्गराट् । शम्भोर्भगवतः सेवासु विषये यज्ञोपवीतपदवीं भजते । स क इत्याह । यः आश्लेषशालिङ्गनेन गिरिजाया:

कुचकुङ्कुमेन कृत्वा रक्तपट्टसूत्रपरिरम्भणस्य शोभा यत्र स तथा। लाटदेशे प्रायेण
कौलिकाकृते यज्ञोपवीते सोत्तरीयके पट्टसूत्रसंश्लेषो मनाक्ग्रन्थिस्थाने भवति। यज्ञो-
-पवीते च क्षणमपि देहाद् विश्लिष्टे महत् प्रिये-(प्राय-)श्चित्तं पततीति रहो-
-वृत्तेऽपि तत् सान्निध्यम्। न च तत् प्रकृतस्थानात् स्थानान्तरं कदापि नीयते।
तथा हि दूषणसम्भवात्। एतेन युक्त्याऽस्य महत्त्वं सूचितम् ॥१०॥

पाणौ फणी भजति कङ्कणभूयमैशे सोऽयं मनोहरमणीरमणीयमुच्चैः।
कोटीरबन्धन धनुर्गुणयोगपट्टव्यापारपारगममुं भज भूतभर्तुः ॥११॥

सोऽयं फणी सर्पः। ऐशे पाणौ कङ्कणभूयं कङ्कणत्वं भजति। कीदृशः? उच्चै-
-रतिशयेन मनोहरा या मणी फणीरत्नं, तया कृत्वा रमणीया मूर्तिर्यस्य स तथा।
अथवाऽयं मनोहरमणिः। अत एव रमणीयं कङ्कणभूयम्। अन्यस्मिन् कङ्कणे
औपाधिकीमणिर्भवति। अत्र तु सहजसिद्धेति महान् विशेषः। अत एवं एनं योग्यत्वाद्
भज। कीदृशम्? भूतभर्तुर्मृत्युञ्जयस्य कोटीरबन्धनं च धनुर्गुणश्च योगपट्टश्च, तेषां
व्यापारो नियोगस्तस्य पारगं समापकमित्यर्थः। यो भूतानां भर्ता, तस्य भूषणादौ
भुजंगा एव भुज्यन्ते[1]। अत्र कोटीरो जटाजूट एव। अयं यथावसरं शम्भोरेतदेतद्
भवति। युगपत्तु समस्तीभवनं तादृशमहियोगात्। एकेनैव वा शरीरेण दीर्घतरत्वाद्
यथायुक्ति तत् तत् सम्पद्यते। कङ्कणानां भवनं कङ्कणभूयम्। [ऐशे] ईशस्यायमैशः [तस्मिन्]
॥११॥

धृत्वैकया रसनयामृतमीश्वरेन्दोरप्यन्यया त्वदधरस्य रसं द्विजिह्वः।
आस्वादयन्युगपदेष परं विशेषं निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥१२॥

एवं द्विजिह्वोऽस्ति, अत एव एकरसनया कोटीरबन्धनतया निकटत्वादीश्वरेन्दो-
-रमृतं धृत्वा अन्यया द्वितीययापि त्वदधरस्य भवद्योष्ठस्य रसं धृत्वा संगृह्य
युगपदेककालमेवास्वादयन् सन्, एतयोरीश्वरेन्द्वमृत-[२१४·a]-त्वदधर[2]रसयोः
परमधिकं विशेषमुत्कर्षं निर्णेतुं निश्चेतुं यदि परं क्षमः स्यान्नान्यः। अयं हि
द्विजिह्वः। अत एव यथावसरलब्धं त्वदधरस्य रसमेकस्यां जिह्वायां धृतं करोतु।
यथावसरलब्धं च शिवचन्द्रामृतमपरस्यां विन्यस्यतु। तदनु द्वयं युगपदनुस्वादयतु।
पश्चादुभयोः परं विशेषं निश्चिनोतु। एकदैव[3] तूभयोर्ग्रहणं न सम्भवत्येव। शम्भोः
शिरसि निशीथिनीनाथसनाथे कोटीरबन्धनतया वर्तमानस्य वासुकेः कथं भैमीसान्निध्यम्।

---

1. Bl. भुज्यन्ते. 2. Bl. om. -रस- 3. Bl. -दै- -देव.

यत् तत्रैव स तदधरस्समास्वादीत। महिमविशेषाद् वाऽऽत्मना सह तामपि कथमपि तत्र नयेत् तदा तदपि सम्भवेत्। तत्त्वतस्तु आपातमनोहराः कवेरीदृशा आलापाः ॥१२॥

आशीविषेण[1] रदनच्छददंष्ट्र(श)दानमेतेन ते पुनरनर्थतया न गण्यम्।

बाधां विधातुमधरे हि न तावकीने पीयूषसारघटिते घटतेऽस्य शक्तिः ॥१३॥

एतेनाशीविषेण ते तव[2] रदनच्छदे दंशस्य दशनव्रणस्य दानं[3] निधानं न गण्यं, न सम्भाव्यम्। कया? अनर्थतया निरर्थकत्वेन ननु सर्वेभ्यः सर्पजातिभ्योऽयमाशीविषो[4] अतिविषोल्बणो भवति, तत्कथं तद् दंशदानमनर्थकमित्याह। हि यस्मात् तावकीने भावत्के पीयूषसारेण घटिते निर्मितेऽधरेऽस्य दन्तदंशस्य शक्तिः प्रभावो न घटते। 'आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति' इति। पृषोदरादित्वात् षकारलोपे सत्याशीविषः। ते इति कृत्यानां कर्तरि वा षष्ठी ॥१३॥

यद्विस्फुरत्फणविलोकनभूतभीतेः कम्पं च वीक्ष्य पुलकं च ततोऽनु तस्याः।

सञ्जातसात्त्विकधि(वि)कारधियः स्वभृत्यान्नृत्यान्नि(न्त्य)षेधदुरु(र)-

-गाधिपतिर्विलक्ष्यः ॥१४॥

उरगाधिपतिर्विलक्ष्यो विलक्षः सन् स्वभृत्यान्निजसेवकान्[5] नृत्यान्त्यषेधत्। किमिति ते नृत्यन्तीत्याह। कीदृशान्? सञ्जातसात्त्विकविकारधियः कस्यास्तस्या भैम्याः कथं ततोऽनु तत्पश्चात्। किं कृत्वा? कम्पं च वीक्ष्य पुलकं च द्वयं सममेव सञ्जातं दृष्ट्वा। कुतो द्वयं जातम्? इत्येवेत्याह। येषां विस्फुरन् समुल्लसन् यः फणानां गणस्तस्मात् भूता यका भीतिर्भयं ततः। तस्या एव वा विशेषणम्। वासुकेरितस्ततः समुपविष्टा ये फणिनस्तेषां विस्फुरतः फणान् दृष्ट्वा तस्या भयात् कम्पपुलकौ समुद्भूतौ। नैर्मातमस्मत् स्वामिवर्णनाकर्णनात् स्वात्त्विकाविति तैर्नर्तितुमारब्धम्। वासुकिस्तु सर्वं तत्त्वं यथावद्वेत्ताऽभिलज्जया तेन म्लानेन ते नृत्यन्तो निषिद्धाः। क्त्वा (त्वा) प्रत्ययेनैव पूर्वकाले लब्धे ततोऽन्विति पदं कम्पपुलकनिरीक्षणसम-[2.4.6]-क्षणमेव नृत्यप्रतिपादनार्थम् ॥१४॥

सद्दे तद्दर्शिभिः स्ववरणे फणिभिर्निराशै-

-र्निःश्वस्य तत्किमपि सूक्ष्ममनात्मनीनम्।

यत्तान् प्रवातुमनसोऽपि विमानवाहा

हा हा प्रतीपपवनाशकुनान्न जग्मुः ॥१५॥

---

1. B1. -विशेषेण 2. B1. न च 3. B1. विधानं 4. B1. शिति— 5. B. भृत्या —

तां दमयन्तीं विरक्तां पश्यन्तीत्येवंशीलास्तद्दर्शिनस्तैस्तद्दर्शिभिरत एव स्ववरण-
-विषये निराशैः फणिभिः निःश्वस्य निश्वासं मुक्त्वा तत्किमप्यधिकतममनात्मनी-
-नम् अनात्महितं सृष्टं कृतम्। यत् कारणात् हा हा महत्कष्टमेतत्। विमानवाहा-
-स्तान् फणिनः प्रयातुमनसोऽपि सन्तः प्रतीपपवन एवाशकुनं दुर्निमित्तं तस्मात्
न गताः। तेषां हि निश्वासपवनो झंझावातसमः सम्मुख आयातस्तच्च महद-
-शकुनमिति ते तान्प्रति न गताः। आत्मने हितमात्मनीनं पश्चात्तत्रा संबन्धः ॥१५॥

ह्रीसंकुचत्फणगणादुरगप्रधानात्तां राजसङ्घमनयन्त विमानवाहाः।
सन्ध्यानमद्दलकुलात्कमलाद् विनीय कह्लारमिन्दुकिरणा इव हासभासम् ॥१६॥

ह्रिया सङ्कुचन् फणानां गणो यस्य तस्मादेवंभूतादुरगप्रधानाद् वासुकेः
सकाशाद् विमानवाहास्तां भैमीं राजसङ्घं भूमीन्द्रवृन्दमनयन्त। सन्ध्यावशान्नमत्
संकुचद् दलकुलं पत्रसमूहो यस्य तस्मादेवंभूतात् कमलात् सकाशाद् विनीय
परिवर्त्येन्दोः किरणा हासभासं विकासश्रियं कह्लारं सौगन्धिकमिव कह्लारं
कुमुदभेदः। केचन जलजताभेदं सपुष्पमाहुः ॥१५॥

देव्याभिधायि भव भीरु! धृतावधाना
भूमीभुजो! भजत भीमभुवो निरीक्षाम्।
आलोकितामपि पुनः पिबतां दृशैना-
-मिच्छा विगच्छति न वत्सरकोटिभिर्वः ॥१७॥

देव्या भगवत्याभ्यधायि। किमुक्तमित्याह। हे भीरु! धृतावधाना भव। मन
एकाग्रं कुरु। भो भूमीभुजो! राजानः यूयं भीमभुवो भैम्या निरीक्षां भजत।
यथेच्छं एनामवलोकयत। परं एतामालोकितामपि सन्तीं पुनर्भूयो दृशा
कृत्या पिबतां वो युष्माकमिच्छा एतद्दर्शनस्पृहा वत्सराणां कोटिभिरपि न
विगच्छति। अपि त्वधिकाधिकैव भवति। स्पर्शनेन भयस्य साक्षाद् दृश्यमान-
-त्वात् भीरु इति संबोधनमत्र सार्थकमुचितम् ॥१६॥

एषां गिरेः सकलरत्नफलः स्मरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः।
मुक्ताफलं फलनसाम्यर्यामाम तन्वन्
नाभाति बिन्दुभिरिव च्छुरितः पयोधेः ॥१७॥

अन्यत् किमुच्चे तद् दर्शयति, देववर्णनोद्देशेन । हे भैमि ! स तादृश एषां देवानां प्राग्दुग्धभूमिसुरभिगिरिर्मेरुपर्वतस्य पञ्चशाखः सकलरत्नफलस्तरुः । खलु नूनं फलनसान्वयनाम मुक्ताफलं तन्वन् सन् पयोधेः [२१५-८] क्षीरनीरनिधे-बिन्दुभिरिव च्छुरित आभाति । पञ्च शाखावयवा यस्य स पञ्चशाखः । पञ्च देवतरवो यस्य पञ्चशाखः । अथ च शाखा लतावयवाः । सकलानि रत्नानि फलानि यस्य स सकलरत्नफलः शाखः । स च सकलानि रत्नानि फलति । स मुक्ता अपि फलति । तासामपि रत्नत्वात् । अत एव फलनयोगात् फलम् । मुक्तैव फलं मुक्ताफलम् । खलु नूनं फलनेनैवं सान्वयं सहान्वयेन यौगिकार्थ-संबन्धेन । सान्वयं तन्वन् भूयस्तया विस्तारयन् दुग्धाब्धेर्बिन्दुभिरिव छुरितः । प्रतिभाति यदायं क्षीरसमुद्रात् निर्गतस्तदापोऽस्मिन् खलु लग्नास्तस्य बिन्दवो बभूवुस्त एवैते मुक्ताफलत्वेन प्रतिभासन्त इत्यर्थः । प्राक् पूर्वं दुग्धा भूमिरेव सुरभिगौर्येन स तथेति मेरोः प्रतीतिजनकमात्रविशेषणं येषां पर्वतस्यैतादृशस्तरु-स्तेषां नगरभवनादिसम्पात् किं कथ्यत इति संक्षेपतः समस्तप्रशस्तश्रीविशेष-सूचनम् । अथ चार्थान्तरम् । स सकलरत्नफलस्तरुः खलु नूनं प्राग्दुग्धभूमि-सुरभेरेषां गिरेः पञ्चशाखो हस्त एव फलनसान्वयनाम मुक्ताफलं तन्वन् सन् पयोधेर्दोहनिकाया बिन्दुभिरिव च्छुरित आभाति एषां गिरेरित्यनेनैव देवसंबन्धितया मेरुप्रतीतिः । पूर्वं भूमेर्गोरूपाया दोहनावसरे त्वस्य तरोः पाणित्वेन संबन्धः । पयांसि दुग्धानि धीयन्तेऽस्मिन्निति पयोधिर्दोहनिकाख्यं पात्रम् । दोग्धुश्च गोर्दोहनावसरे दोहनिकोद्गतदुग्धबिन्दुभिः पाणेश्छुरणं भवत्येव । तच्चातस्तु स्थूलत्वात् मुक्ताः फलानीव मुक्ताफलानि । "सकलरत्नफलस्तरुर्य" इति क्वापि पाठः । तदा य एवंरूप आभातीति योज्यम् ॥१८॥

वक्त्रेन्दुसंनिधिनिमीलदलारविन्दद्वन्द्वभ्रमक्षमसमथाञ्जलिमात्ममू(मौ)लौ ।
कृत्वापराधभयचञ्चलवी(मी)क्ष्यमाणा सान्यत्र गन्तुममरैः कृपयाभ्यमानि ॥३९॥ १९

वक्त्रमेवेन्दुस्तत्सन्निधिवशात् निमीलन्ति सङ्कुचन्ति दलानि यस्यैवंभूतं यदरविन्दद्वन्द्वं, तस्य भ्रमे भ्रान्तौ क्षममञ्जलिं करसम्पुटमात्ममौलौ कृत्वा अपराधभयेन चञ्चलं सकम्पं यथा स्यादेवमीक्ष्यमाणा सती सा भैमी कृपावशादमरैरन्यत्र गन्तुमभ्यमानि अनुमता अनुज्ञातेत्यर्थः । आत्ममौलाविन्यात्मशब्दो-पादानमादरातिशयार्थम् ॥१९॥

तं तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्याः ।
आसन्ननायकविषण्णमुखावलोक (-मुखानुमेय)
भैमीविरक्तचरितानुमयानुजग्मुः ॥२०॥

शिबिकाया अधरे तले तिष्ठन्तीति शिबिकाधरस्था, अत एव यानधुर्यास्तं तादृश-मुदितमुद्गतं, तस्या विरागं विरसभागं मनाक् स्तोकमपि [अ१·८] साक्षात् प्रत्यक्षतया न विदुः स्म, न विन्दति (विदन्ति) स्म। किन्तु आसन्नानां नायकानां विषण्णानि यानि मुखानि तैरनुमेया तर्क्या यासौ भैम्या ~~विरक्तान्~~ विरक्तचरितानुमा विरसवृत्तानुमानं तेनानुजग्मुरनुगच्छन्ति स्म। नु पुनर्जग्मुरिति क्वापि पाठः॥२०॥

रक्षःसु रक्षणमवी(वे)क्ष्य निजं निवृत्तो
विद्याधरेष्व धरतां वपुषैव भैम्याः ।
गन्धर्वसंसदि न गन्धमपि स्वरस्य
तस्या विमृश्य विमुखोऽजनि यानिवर्गः ॥२१॥

यानमस्त्येषां यानिनस्तेषां वर्गः। राक्षसेषु विषये निजं रक्षणं दृष्ट्वा निवृत्तः। तत्र हि सर्वथा रक्षसां संबन्धस्य रक्षा कृतास्ति। विद्याधरेषु विषये भैम्याः सकाशाद् वपुषैवाधरतां हीनतां निरीक्ष्य निवृत्तः। भैम्याः संबन्धिना वा वपुषा। गन्धर्वस्य सभायां तस्याः स्वरस्य गन्धमपि लेशमपि न विमृश्य विमुखो जातः। तस्याः सुरस्य (स्वरस्य) लेशमात्रमपि तत्र विमर्शविषयं नायासीति गन्धर्वसभायां दूरत एव तत्याजेत्यर्थः ॥२१॥

दीनेष्व(षु) सत्स्वपि कृताफलवित्तरक्षैर्यक्षैरदर्शि न मुखं त्रपयैव तस्याम्।
ते जानते स्म सुरसा(शा)खिपतिव्रतां किं तां कल्पवीरुधमधिक्षिति मावतीर्णाम् ॥२२॥

यक्षैस्त्रपयैव भैमीपुर(र)तो मुखं न दर्शितम्। यतो दरिद्रेषु बहुषु सत्स्व-ङ्गीकृता निष्फला वित्तस्य रक्षा यैस्ते तथा। वित्तरक्षा हि दीनोद्धरणं यत् क्रियते। या च तत्र नोपकुरुते, सा खलु तरामफला। ननु तद्दर्शनात् किमिति तेषां कार्पण्यहेतुस्त्रपेत्याह। ते यक्षास्तां भैमीं सुरशाखिनः कल्पवृक्षस्य पतिव्रतां साध्वीं धर्मपत्नीं कल्पवीरुधं कल्पलतामधिक्षिति भूमावतीर्णां न जानते स्म, अपि तु तस्याः प्रत्यङ्गं विविधरत्नखचितविभूषणदर्शनादौदार्योपलम्भाच्च कल्पलताविभ्रमो बभूवेव।

सामान्यस्यापि वदान्यस्य पुरतः कृपणस्य कृपा समुन्मीलति। किं पुनः कल्पलतायाः। अथ च सुरशाखी सोमवंशजो नलस्तस्य पतिंवरां ज्ञात्वाऽपि यत् नत्रायातास्ततो लज्जा-प्रागल्भ्यं च तस्यास्तत्र हेतुरस्त्येव ॥२२॥

अन्यास्ततः फणभृतामधिपं सुरौघान्माञ्जिष्ठमेव (मञ्जि-) मविगाहिपदौष्ठलक्ष्मीम्।
तां मानसं निखिलवारिचयान्नवीना हंसावलीमिव धना गमयांबभूवुः ॥२३॥

तदनन्तरं अन्या विमानधुर्यास्तां भैमीं सुरौघात्सुरसकाशात् फणभृतामधिपं वासुकिं गमयन्ति स्म, प्रापयन्ति स्म। कीदृशीं मञ्जिष्ठाया अयं माञ्जिष्ठः। स चासौ मञ्जिमा मञ्जुभावस्तं विगाहत इत्येवंशीलाः पादौष्ठस्य लक्ष्म्यौ यस्यास्तां लोहितचरणाधरश्रिय-मित्यर्थः। क इव कामित्याह। नवीना नूतना धना मेघा निखि-[२२०-ब]-लाद्वारिचयात् सकाशात् हंसावलीं मानसं नाम सर इव। तामपि माञ्जिष्ठमञ्जिमविगाहिपदौष्ठलक्ष्मीम्। अस्या अपि पदे चञ्चुश्च लोहिताः प्रसिद्धाः। क्रमप्राप्तं पातालाधिपतिमपि तां प्रापयन्नित्यर्थः। न पुनरिह[1] स वर्णितः। पदे चौष्ठौ च पदौष्ठं, पदौष्ठलक्ष्मीमित्यत्र बहुत्वे समासस्योत्पन्न-त्वात्। नद्यृदन्तात् बहुव्रीहौ क इति को न भवति बहुत्वे तस्य विकल्पत्वात्। तथा च—

'अनपत्यं पयोलक्ष्मीनवोमेकत्ववाचिनाम्। नित्यं कः स्याद् बहुव्रीहौ वा स्याद् द्वित्वबहुत्वयोः' इति॥

यस्या विभोरखिलवाङ्मयविस्तरोऽयमाख्यायते परिणतिर्मुनिभिः पुनः सा। ॥२३॥
उद्गत्वरामृतकरार्धपरार्ध्य[2]भालां बालामभाषत सभासततप्रगल्भा ॥२४॥

सा भगवती सभाविषये सततं सर्वकालं प्रगल्भा सप्रतिभा[3] बालां भैमीं पुनरभाषत। कीदृशीम्? उद्गत्वरमुद्गमनशीलं यदमृतकरस्य चन्द्रस्यार्धं खण्डं तद्वत्परार्ध्यमुत्कृष्टं भालं ललाटं यस्या इति तस्यास्तत्कालं समधिकं श्रियोऽधिष्ठातृत्वं सूचितम्। सा केत्याह। यस्या विभोर्भगवत्याः परिणतिः परिणामोऽखिलोऽयं वाङ्मयविस्तर आख्या-यते मुनिभिरिति वक्तृत्ववैदग्धी सूचिता। परिणतिर्विधेया वाङ्मयविस्तरस्त्वनूद्यः। विस्तरणं विस्तर इति स्वरवृद्‌गमिग्रहामप्[—ल—] अशब्दविषयत्वात् घञ् न भवति। 'स्तृञ्श्च प्रथने शब्दे' इति शब्दनिषेधात् ॥२४॥

लोकेशकेशवशिवानपि यश्चकार शृङ्गारसान्तरभृशान्तरशान्तभावान्।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन स क्षोभयन् वितनुतां वितनुर्मुदं वः ॥२५॥

किमभाषत तदाह। हे युवानः स वितनुरनङ्गः। इषुपञ्चकेन रूपादिना कृत्वा

---

1. B1. नष्ट— 2. B1. —परार्घ 3. B1. ॐ सा—

जगतां लोकत्रयवासिनां जनानां ~~पञ्च~~ पञ्चसङ्ख्याकानीन्द्रियाणि चक्षुरादीनि क्षोभयन् व्याकुलयन्, वो युष्माकं मुदं वितनुतां(-म्), प्रीतिं बहलयतु। स क इत्याह। अन्येषां कथैव का यो वितनुः सृष्टिस्थितिसंहृतिहेतुभूतान् महाप्रभावान् लोकेशकेशवशिवान् ब्रह्मविष्णुरुद्रानपि शृङ्गाररसान्तरभृशान्तरशान्तभावांश्चकार। शृङ्गाराख्येन रसेन सान्तरः सव्यवधानो भृशोऽतिशायी आन्तरो मध्यभवः शान्तभावः शान्तत्वं(-म्) येषां ते यथा तानिति विधेयमिदम्। तेऽपि शान्तभावं शृङ्गारसंकीर्णं सकलत्वात् यथादेशेन कलयन्तीत्यर्थः। वितनुरिति साभिप्रायम्। यदि तनुमानभविष्यत्, तदा न ज्ञायते किमकरिष्यदिति ॥२५॥

पुष्पेषुणा ध्रुवममूनिषुवर्षजप्तहुंकारमन्त्रबलभस्मितशान्तशक्तीन्।
शृङ्गारसर्गरसिकद्व्यणुको-[२२०-७]-दरि त्वं द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥२६॥

शृङ्गारप्रधाने सर्गे रसिकं सानुरागं यद् द्व्यणुकं तद्वोदरं यस्याः तस्याः संबोधनं हे शृङ्गारसर्गरसिकद्व्यणुकोदरि। त्वं अमून् (त्वममून्) द्वीपानामधिपान् नयनयोर्गोचरत्वं नय अवधारय पश्येत्यर्थः। कीदृशान्? ध्रुवं नूनं पञ्चेषुणा स्मरेण इषुवर्षेषु बाणवृष्टिषु जप्त उपांशुपठितो यो हुंकारमन्त्रो हुं इत्येवंरूपः सूक्त-विशेषस्तस्य बलं प्राणस्तेन भस्मिता दग्धा शान्तशक्तिर्येषां तान् प्रबलमन्मथ-वशात् शृङ्गारैकमयानित्यर्थः ॥२६॥

क्रमेणाह — स्वादूदके जलनिधौ सवनेन सार्धं
भव्या भवन्तु तव वारिविगाह(-हार)लीलाः।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ॥२७॥

निस्तन्द्रस्य विकस्वरस्य पुष्करस्य पद्मस्य तिरस्करणे जये क्षमे अक्षिणी यस्या-स्तस्याः संबोधनं - हे निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि। तं प्रसिद्धं पुष्करद्वीपस्य पतिं भज। तत्स्वामिना सवननाम्ना पुष्करद्वीपपतिना सार्धं स्वादूदकेषु[1] मृष्टजले जलनिधौ तव जलकेलिविभ्रमा भव्याः सुष्ठ्या भवन्तु। स्वादुसुमृष्टजलनिधाविति यौगिकं नाम ॥२७॥

---

1. ख- स्वादु सुमृष्टमुदकं यत्रेति -

सावर्तभाव भवदद्भुत नाभिकूपे ।
स्वर्भौममेतदुपवर्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
-मेतद्गृहे परिगृहाण शचीविलासम् ॥२८॥

सहावर्तेन वर्तते सावर्तस्तस्य भावः सावर्तत्वम् । तेन भवदद्भुतः सञ्जा-
-यमानश्चित्रो नाभिकूपो यस्यास्तस्याः संबोधनं - हे सावर्तभावभवदद्भुत नाभि-
-कूपे ! एतस्य सदनस्योपवर्तनं देशः । आत्मना स्वेनैव स्वर्भौमं[1] स्वर्भूमस्य
अयं स्वर्भौम, तं स्वर्भौमम् । अत एव एतदीयां श्रियमेव स्वाराज्यं स्वर्गाधि-
-पत्यमर्जयसि न । एतद्गृहे शचीविलासं परिगृहाण वाक्यद्वयमिदं काकुगर्भम[2]-
-धिकत्वशनुमतौ । अर्जयसि नेति काक्वा नञ् विधिवचन एव । अस्य देशश्चेत्
स्वर्गस्तर्ह्यस्य तदधिपतेरिन्द्रत्वमायातम् । अयं चेद् वृत्रस्ततः शचीविलासस्वाराज्यं
च द्वयमर्जितमेव । नाभिकूपस्य सावर्तभावाददद्भुतत्वम् । आवर्तो हि प्रायेण नद्यामेव
भवति । साभिप्रायवचनं —[3]नार्थविशेषस्य सूचितत्वात् नात्राधिकत्वं दोषः ।
एवमन्यत्र ॥२८॥

देवः स्वयं वसति तत्र किल स्वयंभू-
-र्न्यग्रोधमण्डल (प) तले हिमशीतले यः ।
स त्वां विलोक्य निजशिल्पमनन्यकल्पं
सर्वेषु कारुषु करोतु करेण दर्पम् ॥२९॥

यः किल तत्र द्विपे हिमवच्छीतलतले न्यग्रोधमण्डपस्य तलेऽधोभागे स्वयमा-
-त्मनैव स्वयंभूर्विधिर्देवो वसति । स स्वयं-[श्ल. व]-भूर्देवस्त्वामेवानन्यकल्प-
-मनन्यसामान्यं निजशिल्पमात्मविज्ञानं विलोक्य सर्वेष्वन्येषु कारुषु शिल्पिषु
अर्थात् स्वयंभूषु विषये करणे कृत्वा दर्पमहंकारं करोतु । यावन्तो ह्यपरे ब्राह्म (ब्रह्मा)-
-णस्तेषां मध्ये स कोऽपि न सम्भवति यस्य कर ईदृशं शिल्पं करोति । सर्वेषु शिल्पिषु
करोतु करणे (करेण) दर्पमित्यनुप्रासस्योल्बणत्वभयात् । अतितरामावर्तमाना हीदृशा
वर्णाः प्रायेणोल्बणा भवन्ति । नन्वत्र कवेरवधानता । 'कारुः (रु:) शिल्पि' इति द्वय-
-मेकार्थमेव । हिमशीतलतले न्यग्रोधमण्डपतल इति स्वरूपकथनेन स्वयंभुवोऽपि वात्सल्याभि-
-सूचनम् ॥२९॥

1. B. स्वर्भूमिविकारः स्वर्ग एवेत्यर्थः । 2. Bl. om. काकुगर्भमधिक — 3. Bl. om. —
-नार्थविशेषस्य.

न्यग्रोधनादिव दिवः पतदातपादेः -

- न्यग्रोधमात्मभरधारमिवावरोहैः । (- भग्न -)

तं तस्य पाकिफलनीलदलद्युतिभ्यां

द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ॥३०॥

हे भैमि! तं न्यग्रोधं वटं पाकिफलनीलदलद्युतिभ्यामुपलक्षितम्। अत एव तस्य द्वीपस्य पुष्करस्य शिखिपत्रजं मायूरमातपत्रं छत्रं पश्य। पाको विद्यते येषां तानि पाकीनि, ~~पाकि~~ पाकीनि च तानि फलानि च पाकिफलानि, नीलानि च तानि दलानि च नीलदलानि, पाकिफलनीलदलयोर्द्युती, ताभ्याम्। मायूरमातपत्रं चन्द्र- -कोमलक्षितनीलपत्रमयत्वादीदृशमेव भवति। उत्प्रेक्ष्यते दिवो नभसः सकाशात् पतत् आतपवृष्ट्यादे (रि) भ्यः नीचैर्भूय रोधनाद्वारेण। न्यग्रोधमिति न्यग्रोधशब्दः पुनरावर्तते। किञ्च, अवरोहैः शाखातोऽधोगामिभिर्जटाभिः कृत्वाऽऽत्मभरेण गौरवेण भग्नं रुग्णमि- -वेति वटस्य तस्याकृतेः सौष्ठवमुक्तम्। वटस्याधिष्ठाता विधिः। स्त्रियोऽपि वटशब्दं स्त्रीवृत्तिं कृत्वा विधियोगाद् विधिवटीति व्यपदिशन्ति। वटीशब्दवाच्यस्य स्त्रीत्वात् तन्मूलाधिष्ठितं विधिमपि स्त्रीत्वे न व्यवहरन्ति। ज्यैष्ठमासामावास्यादौ च विशिष्य तत्रैव विधिं पूजयन्ति। तस्मात् त्वमपि तत्र विधिं विधिवत् पूजयेरित्यर्थः ॥३०॥

न श्वेततां चरतु वा भुवनेषु राजहंसस्य न प्रियतमा कथमस्य कीर्तिः।

चित्रं तु तद्विशदिमाद्वयमादिशन्ती क्षीरं च नाम्बु च मिथः पृथगातनोति ॥३१॥

चञ्चुचरणैर्लोहितैरुपलक्षितो हंसो राजहंस इत्युच्यते। अस्य राजहंसस्य प्रियतमा प्रेयसी राजहंसी कीर्तिर्न श्वेततां भुवनेषु जलेषु वा कथं न चरतु, निजभक्ष्यं भक्षयतु; अपि तु श्वेता भवतु, जलेषु च चरतु। हंसप्रियाया एतद् युज्यते, राजहंसस्य प्रियायास्तु विशेषतः। तत् तु चित्रं, यद् विशदिमाद्वयं विशदैक्यमादिशन्ती स्थापयन्ती सती, क्षीरं दुग्धं [२११.८] च अम्बु जलं च मिथः परस्परं मिलिते सती पृथक् विभिन्ने न तनोति। राजहंसस्य प्रियतमा हि क्षीरनीरविवेचनं करोति। इयं च तन्न करोतीति चित्रम्। छलेनायमर्थः। तत्त्वतस्तु राजहंस इव राजहंसः। अस्य राजहंसस्य प्रियतमा- -ऽनिरुचिता कीर्तिर्न श्वेततामपि तु श्वैततताम्। भुवनेषु जगत्सु वा कथं न चरतु, न भ्राम्यतु। अपि तु, नृपोत्तमस्य कीर्तिरिदं द्वयं करोतु। यद्विशदिम्नः श्वैतत्वस्याद्वयमै- -क्यमादिशन्ती निवेशयन्ती सती क्षीरनीरे पृथक् न करोति, द्वयोरैक्यमेवानया कृतं विषयस्य विशदीकृतत्वात् ॥३१॥

शूरेऽपि शूर-(सूरि-)परिषत्प्रथमार्थितेऽपि (-र्चितेऽपि)
शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि।
तस्मिन्नवधेमियमाप तदेव नाम यत्
कोमलं न किल तस्य नलेति नाम ॥३२॥

तस्मिन् सवननामनि राजनि, इयं भैमी तदेवायथं दूषणमाप। नाम प्रकाशं यत्किल नलेति न कोमलं नाम। दूषाणान्तरं गवेषयन्त्यापि, इदमेवैकं दूषणं लब्धमित्यर्थः। कीदृशे? शूरे विक्रान्तेऽपि शू(सू)रीणां धीमतां परिषदि सभायां प्रथमार्थिते (-र्चिते) पुरः पूज्येऽपि, शृङ्गारभङ्गिभिर्मधुरेऽपीन्द्रियप्रीणकेऽपि, कलानां नानाविधानां गीतादीनामाकरेऽपि। एत एव च गुणा वरे गवेष्यन्ते। नलेति वर्ण-द्वयानुकरणमात्रम्। अन्यथा 'नल इति' प्राप्नोति। लिङ्गार्थमात्रे प्रथमायाऽनिवार्यत्वात् ॥३२॥

भ्रूवल्लिवेल्लितमथाकृतिभङ्गिमेषा लिङ्गं चकार तदनादरणस्य विज्ञा।
राज्ञोऽपि तस्य तदलाभजतापवह्निचि(-श्चि)ह्नं बभूव मलिनच्छविभूमधूमः ॥३३॥

अथ एषा विज्ञा भ्रूवल्लिवेल्लितमेव तदनादरणस्य सवननाम्नः स्वीकारस्य चिह्नं चक्रे। तस्य राज्ञोऽपि मलिना चासौ च्छविश्च तस्या भूमा बाहुल्यं स एव धूमः। तस्याऽलाभजातो यस्तापः स एव वह्निस्तस्य चिह्नं बभूव। धूमाद् वह्निरनुमीयत एव ॥३३॥

राजान्तराभिमुखमिन्दुमुखीमथैनां जन्या जना हृदयवेदितयैव निन्युः।
अन्यानपेक्षितविधौ न खलु प्रधानवाचां भवत्यवसरः सति भव्यभृत्ये ॥३४॥

अथ जन्या जना हृदयवेदितयैव एनां चन्द्राननां राजान्तराभिमुखमपरनृप-सम्मुखं निन्युः। युक्तोऽयमर्थः। खलु यस्मात् भव्ये दक्षे भृत्ये सेवके सत्येव अन्यानपेक्षितविधौ प्रधानस्य स्वामिनो वाचामवसरो न भवति। स एवं करोती-त्यर्थः। हृदयमाशयं विदन्तीति हृदयवेदिनस्तेषां भावो हृदयवेदिता चित्तज्ञता, तथा। परेषामनपेक्षितोऽरुचितो यो विधिर्विधानं परस्य, स्वामिने यन्न रोचते। तदुचितमुत्तरं परिचारक एवाचर-[११२.a]-तीत्यर्थः।[1] वेल्लितप्रेषिता धूत-वलिता कम्पिता धूते ॥३४॥

---

1. वेल्लित --- धूते ॥ This should be taken in comm. of st. 33.

ऊचे पुनर्भगवती नृपमन्यमस्यै निर्दिश्य दृश्यतमतावमताश्विनेयम् ।
आलोक्यतामयमये ! कुलशीलशाली शालीनतानतमुखस्य निजास्यबिम्बम् ॥३५॥

भगवती पुनरूचे । किं कृत्वा ? दृश्यतमतावमताश्विनेयमन्यं नृपमस्यै भैम्यै निर्दिश्याङ्गुल्या प्रदर्श्य । किमूचे तदाह । अये सुभगे भैमि ! शालीनतयाऽधृष्टतया । नतं नम्रं निजास्यबिम्बं स्वमुखमण्डलमुखस्योत्क्षिप्यायं कुलशीलशाली नृप आलोक्यताम् । कुलं च शीलं च कुलशीले, ताभ्यां शालते श्लाघते तच्छील: कुलशीलशाली श्लाघार्थमतिशयेन दृश्यो दृश्यतमस्तस्य भावो दृश्यतमता, तयाऽवमताऽवगणितावाश्विनेयौ येन तम् ॥३५॥

एतत्पुरः पठदपश्रमबन्दिवृन्दवाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदानामर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ॥३६॥

एतस्य पुरोऽग्रे पठन्ति अपश्रमाणि खेदरहितानि यानि बन्दिनां वृन्दानि, तेषां वाग्डम्बरा वचनस्फूर्जितानि, तैः कृत्वा अनवकाशतरे सर्वथाऽवकाशरहितेऽम्बरे खेऽपि मम पदाना-मुत्पत्तुमुत्थातुं पदं स्थानमेव नास्ति पुनरुक्तिषु पातुकानामर्थोऽभिधेयोऽपि नास्ति प्रयोजनं वा पदानि स्याद्यन्तानि त्याद्यन्तानि च तेषां शब्दरूपत्वादुत्पत्तिस्थानमम्बरं तत्रोत्पत्तुं स्थानं नास्ति वाग्डम्बरैरेव तस्य निचितत्वात् । यन्मया यैः पदैः कृत्वा वक्तव्यम् । तस्य बन्दिवाग्डम्बरैरेवोक्तत्वादर्थः प्रयोजनमपि नास्ति । अथ पदानां चरणानां भूमेर्वार्तैव का । अम्बरेऽपीत्यपि शब्दार्थः ॥३६॥

नन्वत्र हव्य इति विश्रुतनाम्नि शाकद्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाबिरुदबन्दिजयानयापि किं रागि राजनि गिराजनि नान्तरं ते ॥३७॥

भो भैमि ! अनया गिरा वाचापि कृत्वा ते तवान्तरं मध्यं हृदयमत्रास्मिन् हव्य इति विश्रुतनाम्नि राजनि विषये रागि सानुरागं नाजनि, न जातम् । अपि तु, रागि भवितुं युज्यते । कीदृश्या गिरा । एतस्य भुजयोर्यानि बिरुदानि प्रतिपक्षोद्वेगो प्रौढगुणवर्णनविशेषास्तेषां बन्दिनः स्तुतिपाठकाः तेभ्यो जाता, तया । किं कुर्वत्या ? सुधीसु विद्वत्सु विषये असुधा सुधा-भवन्त्या सुधीभवन्त्या अमृतत्वेन परिणमन्त्या । कीदृशेऽस्मिन् । शाकाख्यं द्वीपं प्रशास्ती-त्येवंशीलस्तस्मिन् नन्विति साक्षेपे संबोधने ॥३७॥

शाकः शुकच्छदसमच्छविपत्रमालभारी हरिष्यति तरुस्तव तत्र चित्तम् ।
यत्पल्लवौ-[२२२-६]-घपरिरम्भविजृम्भितेन ख्याता जगत्सु हरितो हरितः स्फुरन्ति ॥३८॥

हे सुभगे ! तत्र शाकद्वीपे शाकनामा तरुस्तव चित्तं हरिष्यति, स्ववशतां नेष्यति । कीदृशः ? शुकच्छदैः कीरपक्षैः समा तुल्या च्छविः कान्तिर्येषां तान्येवं-रूपाणि यानि पत्राणि दलानि, तेषां मालां बिभर्तीत्येवंशीलः । यकारौ ङ्यीकृतौ ह्रस्वौ क्वचिदिति भारिशब्दे मालाशब्दस्य ह्रस्वः । यस्य शाकतरोर्यः पल्लवा-नामोघः समूहस्तस्य परिरम्भ आश्लेषस्तस्य विजृम्भितं प्रसरणं, तेन हरितो नीलाः सत्यो हरिद्गुणविशिष्टा दिशो जगत्सु भुवनेषु स्फुरन्ति, समुल्लसन्ति । गम्या सम्भावना । एतेन तरस्य महत्त्वं द्योतितम् ॥३८॥

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा यन्मारुतः कमपि संमदमादधाति ।

कौतूहलं तदनुभूय विधेहि भूयः श्रद्धां पराशरपुराणकथान्तरेऽपि ॥३९॥

तत्र शाकद्वीपे तत्तरुपत्रजन्मा मारुतः स्पर्शेन त्वगि(गि)न्द्रियसंसर्गेण कृत्वा किल यत् । कमप्यनिर्वचनीयं संमदं हर्षमादधाति करोति । किलेत्यागमोक्तौ एवं ह्यागमवचनम् । तत्कौतूहलमनुभूयोपलभ्य ~~कथान्तरेऽप्य~~ भूयोऽधिकतरं यथा-स्यादेवं पराशरपुराणस्य कथान्तरेऽप्यन्यास्वपि कथासु श्रद्धां विधेहि सम्प्रत्ययं कुरु । आगमोक्तोऽर्थो यदि प्रत्यक्षीक्रियते, तदा तत्र महती श्रद्धा भवति । यश्च यथैकत्रानुभूतः स प्रायेणान्यत्रापि तथैव । पराशरपुराणं विष्णुपुराणम् । स चासौ तरुस्तात् तरुः ॥३९॥

क्षीरार्णवस्तव कटाक्षरुचिच्छटाभामन्वेतु तत्र विकटायितमायताक्षि ।

वेलावनीवनततिप्रतिबिम्बचुम्बकिर्मीरितोर्मिचयचारिमचापलाभ्याम् ॥४०॥

तत्र शाकद्वीपे क्षीरार्णवस्तव कटाक्षरुचिच्छटाभामपाङ्गनिरीक्षणं कान्तितरङ्गाणां विकटायितं विकटवदाचरितमन्वेत्वनुगच्छतु । काभ्यां कृत्वा वेलावन्यां तटभूमौ या वनततिः काननराजिः, तस्याः प्रतिबिम्बस्य चुम्बः स्पर्शस्तेन किर्मी-रितश्चित्रितो य ऊर्मीणां चयो राशिस्तस्य चारिमचापलाभ्यां चारुत्वचाञ्च-ल्याभ्यामिति कटाक्षगतस्य कालधवलचपलत्वस्यानुकारः । चारोर्भावश्चारिमा ॥४०॥

बालातपैः कृतकगैरिकतां कृतां द्विस्तत्रोदयाचलशिलाः परिशीलयन्तु ।

त्वद्विभ्रमभ्रमणजश्रमवारिधारिफालाङ्गुलिगलितया नखलाक्षयापि ॥४१॥

तत्र द्वीपे उदयाचलस्य शिलाः बालातपैः कृतां कृतकगैरिकतां कृत्रिमधातुत्वं द्विः द्वौ वारौ परिशीलयन्तु परिचिन्वन्तु । अथवा बालातपैः कारणभूतैर्या

कृतकगैरिकता तां द्विःकृतौ [२२३-a] धारद्वयकृतां परिशीलयन्तु। कथं द्विः-
-कृतामित्याह। तव विभ्रमेण विलासेन यद्भ्रमणं संचरणं तस्माज्जातः स चासौ
श्रमस्तस्य वारि जलं तद्धारयन्तीत्येवंशीला याः पादाङ्गुलयस्ताभ्यो गलितया
स्रुतया भवत्याः लाक्षया यावकेनापि। उदयाचले प्रतिदिनं बालातपः सुलभः तेन
च तच्छिलानां लोहितीकृतत्वात् कृत्रिमा गैरिकता। तत्र च भवत्या विभ्रमेण
भ्रमन्त्याः श्रमजललाक्षाधारिचरणाङ्गुलीनखेभ्यो गलितया लाक्षया कृतकगैरिकता
द्विःकृता भवत्येव। अन्येषामपि गिरीणां शिलासु बालातपैः क्षणं कृतकगैरिकता
भवत्येव। तत्र त्वत्सान्निध्याद् विशेषवती अथवा तत्स्वरूपकथनमात्रं द्विःकरणं
तु विधेयम्। स्त्रीचरणयोर्लाक्षा प्रसिद्धैव ॥७१॥

नृणां कलम्बितमुदामुदयन्मृगाङ्कशङ्की सृजत्वनघजङ्घि! परिभ्रमन्त्याः।
तत्रोदयाद्रिशिखरे तव दृश्यमास्यं कश्मीरसम्भवसमालभनाभिरामम् ॥७२॥
हे अनघजङ्घि! तत्र द्वीपे कश्मीरसम्भवं कुङ्कुमं, तस्य समालभनेन विलेपनेनाभि-
-रामं तव विचरन्त्या आस्यं मुखमुदयाद्रेः शिखरे दृश्यं सत् कलम्बितमुदामुद्-
-गतहर्षाणां नृणामुदयतो ~~मृगाङ्कस्य~~ मृगाङ्कस्य भ्रान्तिं विदधातु। उदयी शशी
कुङ्कुमरेणुमण्डलो भवत्येव कलम्बितमुदामुदयविन्दुदर्शनादेव भ्रमन्त्या उदयाद्रिशिखर एव
॥७२॥
एतेन ते विरहपावकमेत्य तावत्कामं स्वनामकलितान्वयमन्वभावि।
अङ्गीकरोषि यदि तं तव नन्दनाद्यैर्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥७३॥
हे भैमि! एतेन राज्ञा तव वियोगाग्निं प्राप्य तावत् स्वनामदग्ध इति निजाभि-
-धानं कामं यथेच्छं कलितान्वयं धृतार्थसंबन्धमनुभूतम्। वह्नौ दयत इति दग्धः।
तच्च दर्शितयुक्तास्य सम्पन्नां यदि तं नृपमङ्गीकरोषि तत् ततस्तव नन्दनाद्यैः
पुत्रपौत्रप्रपौत्रैः कृत्वा स्वयमात्मानमपि लब्धान्वयमातनोत्विति छलेनान्वयशब्दस्य
स एवार्थः। तत्पक्षस्त्वत्रान्वयो वंशः लब्धोऽन्वयो वंशो येन स तथा ॥७३॥
लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सामुत्र दूषणमगीगणदेकमेव नार्थी बभूव मघवा यदमुष्य देवः ॥७४॥
सा भैमी अमुत्र नृपे तदेव दूषणं गणितवती यदस्य स्वयमिन्द्रो देवो मार्गणो
नाभूत्। नलस्य त्वभूदित्येतस्मात् तस्य विशेषः। कीदृशि? लक्ष्मीरेव लता, तस्याः
समवलम्बं समाश्रयणं विधत्ते ययोरेवंभूतौ भुजावेव द्रुमौ यस्य तस्मिंस्तथाभूतेऽपि

वाग्देवताया आयतनं गृहं मञ्जु मनोज्ञं मुखमेवाम्बुजं यस्य तस्मिंस्तथापि।
[१२३.८] एतद्देव च द्वयं राजघरेषु मुख्यतया मृग्यते। अपि द्वयं विशेषणद्वयस्य
1 स्वप्राधान्यमाह ॥४४॥

लक्ष्मीविलासवसतेः सुमनःसु मुख्यात् (त्त)स्मादिकृष्य भुवि लब्धगुणप्रसिद्धेः[2]।
स्थानान्तरं तदनु निन्युरिमां विमानवाहाः पुनः सुरभितामिव गन्धवाहाः ॥४५॥

तदनु पश्चात् विमानवाहा इमां भैमीं तस्मान्नृपाद्विकृष्य विश्लेष्य स्थानान्तरम्-परं स्थानं निन्युः। कीदृशात्? लक्ष्म्या विलासवसतेः किल वेश्मनः। तथा सुमनस्सु विद्वत्सु मुख्यात्[3] प्रधानात्। तथा भुवि लब्धगुणैः शौर्यादिभिः कृत्वा प्रसिद्धिः ख्यातिर्येन तस्मात्। क इव? गन्धवाहा वायव इव। काम्? सुरभितां परिमलश्रियम्। कस्मात्? लक्ष्मीविलासवसतेः कमलात्। कीदृशात्? सुमनःसु कुसुमेषु विषये मुख्यात्। तथा भुवि लब्धगुणानां परिमलशैत्यपावित्र्यादीनां प्रकृष्टा सिद्धिर्निष्पत्ति-र्येन, तस्मात्। स्थानान्तरमिति समानम् ॥४५॥

भूयस्ततो निखिलवाङ्मयदेवता सा हैमोपमेयतनुभासमभाषतैनाम्।
एवं (एनं) स्वबाहुबहुवारनिवारितारिं चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति! ॥४६॥

ततः सा निखिलस्य वाङ्मयस्य देवताधिष्ठात्री एनां हैमोपमेयतनुभासं भैमीं भूयो-ऽभाषत। किं बभाषे तदाह। हे कुरुविन्दसकान्तिदन्ति! एनं स्वबाहुभ्यां बहून् वारान्नि-वारिता अरयो येन तं तादृशं नृपं चित्ते कुरुष्व। कुरुविन्दाख्यं रत्नं, तेन समाना कान्तिर्येषामेवंभूता दन्ता यस्यास्तस्याः सम्बोधनम्। भारतीभैम्योर्विशेषणस्य साभि-प्रायत्वेन प्रकृतोपयोगित्वात् न वैयर्थ्यम् ॥४६॥

द्वीपस्य पश्य दयितं द्युतिमन्तमेतं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।
यन्मण्डले स किल मण्डप(ल)सन्निवेशः पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः ॥४७॥

किं बभाषे तदाह। भो भैमि! चञ्चलस्य दृगञ्चलस्य कटाक्षस्य विभ्रमेण विलासेन कृत्वा। एतं द्युतिमन्तं नाम क्रौञ्चाख्यस्य द्वीपस्य पतिं पश्य। किलेत्यागमे। यस्य मण्डले देशे मण्डलसन्निवेशो मण्डलाकृतिः पाण्डुः शुक्लो दधिमण्डपयोधेर्म-स्तुसमुद्रस्य पूरो महान् जलराशिः चकास्ति। मण्डं दधिभवं मस्तु [इत्यमरः] ॥४७॥

---

1. B, D. स्वप्राधान्यमान्यमाह। 2. D. -प्रसिद्धम्. 3. B1. -ख्यात्-

तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान् ।
हंसावलीकलकलप्रतिनादवाग्भिः स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥४८॥

तत्र द्वीपे भवदङ्घ्रिविहारयाचनशीलः क्रौञ्चो नामाद्रिरस्ति । यः क्रौञ्चहंसावलीनां कल-
-कलस्तस्य प्रतिनादः, प्रतिध्वनिः, सैव वाग्यत्र एवंभूतानि [225.a] स्कन्देषूणां
कार्तिकेयशराणां यानि वृन्दानि परम्परास्तद्विवरैर्मुखसदृशैः कृत्वा त्वदीयान् गुणान्
विवरीतुकामो व्याख्यातुमिच्छुरिव स्फुरिष्यति । अयं च व्यतिकरस्तत्रत्यः पुराणे
प्रसिद्धो ऽस्त्येव ॥४८॥

वैदर्भि ! दर्भदलपूजनयापि यस्य गर्भे जनः पुनरुदेति न जातु मातुः ।
तस्यार्चनां रचय तत्र मृगाङ्कमौलेस्तन्मात्रदैवतजनाभिजनः स देशः ॥४९॥

तत्र द्वीपे त्वं तस्य मृगाङ्कमौलेश्चन्द्राभरणस्य विविधैः कुसुमैः पूजां रचय
सृज । यतः स देशः स एव तन्मात्रं यद्दैवतं देवो यस्य एवंभूतो यो जनो लोक-
-स्तस्याभिजनः कुलं यत्र स तथा । तत्र सर्वे जनाः शैवा एव सन्तीत्यर्थः । तस्य
कस्येत्याह । भो वैदर्भि ! यस्य भगवतो दर्भदलपूजनया कुशपत्रपूजनेनापि जनो लोकः
जातु कदाचिदपि मातुर्गर्भे पुनर्नोदेति मुक्त एव भवतीत्यर्थः ॥४९॥

चूडाग्रचुम्बिमिहिरोदयशैलशीलस्तेनाः स्तनंधयसुधाकरशेखरस्य ।
तस्मिन् सुवर्णरसभूषणरम्यहर्म्यभूभृद्घटा घटय हेमघटावतंसाः ॥५०॥

किञ्च । तस्मिन् द्वीपे स्तनंधयो बालः सुधाकरश्चन्द्रः शेखरे मुकुटे यस्य तस्य ।
शम्भोः सुवर्णरसस्य हेमद्रवस्य भूषणेन विलेपेन रम्याणि यानि हर्म्याणि, तेषां घटाः
पङ्क्तीः । हेमनो (म्नो) घटाः कलशाः अवतंसा यासां ता एवंभूताः । घटय निर्मापय ।
कीदृशीः ? चूडाग्रचुम्बी मिहिरः सूर्यो यस्य स एवंभूत उदयप्रधानो यः शैलः तस्य
शीलं वृत्तं, तस्य स्तेनाश्चौरीः । तत्सदृशीरित्यर्थः । घटानां सौवर्णानां रविरुपमानं
हेमसुवर्णरसभूषितहर्म्यघटानां तु नवरविकरलिप्त उदयाद्रिः ॥५०॥

तस्मिन्मलिम्लुच इव स्मरकेलिजन्मघर्मोदबिन्दुमयमौक्तिकमण्डनं ते ।
जालैर्मिलद्दधिमहोदधिपूरलोलकल्लोलचामरमरुत्तरुणि ! छिनत्तु ॥५१॥ (छिद्य)

हे तरुणि ! तस्मिन् द्वीपे जालैर्गवाक्षैर्मिलन् संश्लिष्टो भवन् । दधिमहोदधेः पूरस्य
जलराशेर्ये लोलाः कल्लोलास्त एव चामराणि स्तै(तै)र्वा मरुद्वायुः । तव स्मरकेलेः
सुरतक्रीडाया जन्म यस्य तस्यैवंभूतस्य घर्मस्योष्मणो ये उदबिन्दवो जलकणास्तैर्निर्वृत्तं

यन्मौक्तिकमण्डनं तत्। मलिम्लुच इव चौर इव छिनत्तु, अपहरतु। चौरो हि गवाक्षेण हस्तं प्रसार्य मिलन् सन् हर्म्यान्तरवर्तमानायाः सुरतकेलिकलितश्रमायाः कस्यापि धनवतो नायिकाया मौक्तिकमण्डनमाच्छिनत्ति। तरुणीति सम्बोधनं साभिप्रायं स्मरकेलिप्रागल्भ्यसूचनपरम्॥५१॥

एतद्यशो नवनवं स्व-[२२५-६]-लु हंसवेशं वेशन्तसन्तरणदूरगमक्रमेण।
अभ्यासमर्जयति सन्तरितुं समुद्रान्क्रान्तुं च निःश्रममितः सकलान् दिगन्तान्॥५२॥

हंसवेशं मरालरूपधारि खलु नूनमेतस्य राज्ञो यशः कर्तृ वेशन्ता पल्वलानि, तेषां सन्तरणं दूरं गमो गमनं दूरगमस्तयोः क्रमः परिपाटी तेन कृत्वाऽभ्यासमर्जयति परिशीलनमुपास्ते। किं कर्तुं यथासङ्ख्यं समुद्रान् तरीतुम्। इतो द्वीपात् सकाशात् निःश्रमं श्रमं विनैव सकलान् दिगन्तान् गन्तुम्। अभ्यस्ते कर्मणि क्रियमाणे श्रमो न भवति। मानसाख्यस्य सरसो नैकधा (स्था) दितस्ततः प्राचुर्येण (ण) हंसानां दृश्यमानत्वाद् इत्थमूहः। ब्रह्मसरःसान्निध्यं वा सूचितम्॥५२॥

तस्मिन् गुणैरपि भृते (वृते) गणनादरिद्रैस्तन्वी न सा हृदयबन्धमवाप भूपे।
दैवे विरुन्धति निबन्धनतां वहन्ति हन्त प्रयासपरुषाणि न पौरुषाणि॥५३॥

तस्मिन् नृपे गणनादरिद्रैः सङ्ख्यातीतैर्गुणैः शौर्यादिभिर्वृते[1] बन्धितेऽपि सा तन्वी हृदय-बन्धं चित्तग्रथनं नावाप। युक्तोऽयमर्थः। हन्त खेदे। दैवे विरुन्धति विरोधमुद्भाव-यति सति, पौरुषाणि पुरुषकारा निबन्धनतां साधनतां न वहन्ति, न धारयन्ति। अत एव निष्फलत्वात् प्रयासेन कृत्वा परुषाणि कर्कशानि दैवप्रतिकूले खलु धमानि निष्फ-लीभूय प्रयासदुःखमेवावहन्ति॥५३॥

ते निन्यिरे नृपतिमन्यमिमाममुष्मादंसावतंसशिबिकांशभृतः पुमांसः।
रत्नाकरादिव तुषारमयूखलेखां लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम्॥५४॥

ते अंसावतंसं स्कन्धाभरणं शिबिकाया अंशमेकाङ्गं बिभ्रति ते अंसावतंसं[2] तादृशाः पुमांस इमां भैमीमन्यं नृपतिं निन्यिरे, प्रापितवन्तः। लेखानुजीविपुरुषा देवसेवकाः समुद्रादिन्दुकलां हरशिर इव। नयनमात्र एवेदमुपमानम्। इन्दुलेखा हि हरशिरस्यवस्थिता॥५४॥

एकैकमद्भुतगुणं धृतभूषणं[3] च हित्वान्यमन्यमुपगम्य परित्यजन्तीम्।
एतां जगाद जगदर्चितपादपद्मा पद्मामिवाच्युतभुजान्तरविच्युतां सा॥५५॥

सा जगदर्चितपादपद्मा सरस्वती एतां जगाद। उत्प्रेक्ष्यते। अच्युतस्य विष्णोर्भुजा-न्तराद् वक्षःस्थलाद् विच्युतां पतितां पद्मां लक्ष्मीमिवेति श्रियः सान्निध्यं तस्याः

1. श - भृते. 2. श्री. वा. तै अंसावतंसं. 3. श्री. धृतदूषणं

सूचितम्। किं कुर्वती? एकैकमेकमेकं प्रति अद्भुता गुणा यस्य तम्। धृतानि भूषणानि येन तथाविधं चान्यमुपगत्यान्यं परित्यजन्तीम्। अन्यं गृह्णतीमन्यं मुञ्चती-मिति। लोकोक्तेरनुकारोऽयम् ॥५५॥

ईशः कुशेशयसनाभिशये! कुशेन [२२५.७] द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते।
ज्योतिष्मता सममनेन वनीघनासु तत्त्वं विनोदय धृतोदतटीषु चेतः ॥५६॥

कुशेशयस्य पद्मस्य सनाभिः सगोत्रः शयः पाणिर्यस्यास्तस्याः सम्बोधनम्।
हे कुशेशयसनाभिशये! कुशेन दर्भेण स लाञ्छिततनोश्चिह्नितमूर्तेर्द्वीपस्येशः पतिः। यदि ते तव वाञ्छितोऽस्ति तत्ततः अनेन ज्योतिष्मता समं वनीभिः काननराजीभिर्घनासु दुःसञ्चरासु धृतोदस्योदस्य समुद्रस्य तटीषु रोधोभूमिषु चेतो विनोदय, मनः सुखय समययापनं कारय। ज्योतिष्मान्नाम राजा ॥५६॥

वातोर्मिदोलनचलद्दलमण्डलाग्रभिन्नाभ्रमण्डलगलज्जलजातसेकः।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूडश्चित्राय तत्र तव नेत्रनिपीयमानः ॥५७॥

तत्र द्वीपे कुशस्य स्तम्बो गुच्छः नेत्राभ्यां निपीयमानः सन् तव चित्राय विस्मयाय भविता, भविष्यति। चित्रे कारणमाह। यतः कीदृशः? वातानामूर्मयो लहर्यस्तासां दोलनेन प्रेषणेन चलन्ति कम्पमानानि यानि दलमण्डलस्य पत्रसमूहस्याग्राणि शिखा सूचयस्तानि निर्भिन्नानि प्रोतानि यान्यभ्रमण्डलानि घटपटलानि तेभ्यो गलत् प्रचुम्बमानं यज्जलं, तेन जातः सेको यस्य स तथा। अम्बरचुम्बिन्यश्चूडा शिखा यस्येति कामितजलसेकोपचयकथनम्। 'स्तम्बो गुच्छस्तृणादिनः' ॥५७॥

पाथोधिमाथसमयोत्थितसिन्धुपुत्रीपत्पङ्कजार्पणपवित्रशिलासु तत्र।
पत्या सहावह विहारमयैर्विलासैरानन्दमिन्दुमुखि! मन्दरकन्दरासु ॥५८॥

हे इन्दुमुखि! तत्र द्वीपे पत्या सह मन्दरस्य गिरेः कन्दरासु विहारमयैः क्रीडा-निर्वृत्तैर्विलासैर्विभ्रमैः कृत्वा आनन्दमावह, प्रीतिमाप्नुहि। कीदृशीषु पाथोधिमाथ-समये समुद्रमथनकाले उत्थिता निर्गता या सिन्धुपुत्री श्रीस्तस्याः पत्पङ्कजयोरर्प-णेन विन्यासेन पवित्राः शिला यस्येति महत्त्वकथनम्। पद्शब्दः ॥५८॥

आरोहणाय तव सज्ज इवास्ति तत्र सोपानशोभिवपुरश्मवलिच्छटाभिः।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धिक्षुब्धाचलः कनककेतकगौरगात्रि! ॥५९॥

कनककेतकस्य स्वर्णकेतकीकुसुमस्य गौरमन्चयो गात्रं यस्यास्तस्या: संबोधनं हे कनककेतकगौरगात्रि! अब्धे: क्षुब्धो मन्थोऽचल: अब्धिक्षुब्धाचल: । तत्र द्वीपे तदारोहणाय सज्ज: कृतावधान इवास्ति । कीदृश: ? । सोपानैरारोहणै: शोभते सोपान-शोभि एवंभूतं वपुर्यस्य स तथा । काभि: कृत्वेत्याह । [225.6] अश्मवलीनां पाषाण-सन्धिलेखानां छटा धारास्ताभि: । कीदृशीभि: ? भोगेन्द्रस्य वासुकेर्वेष्टनानां शतं, तस्य धृष्टयो घर्षणानि, तै: कृताभि: । प्रसिद्धमथ खण्डनेऽप्रसादस्थादेतदनुमेयं क्षुब्धो मन्थ: । केचित्तु – अब्धिक्षुब्धा (ब्धि:) समुद्रमथनशीलोऽचल इत्याहु: । तदा क्षुभिवाहिरवनि-ध्वनीत्यादिनेऽनिषेधसिद्धस्य विशेषो दर्शितो न भवेत् ॥ 59॥

मन्था नग: स भुजगप्रभुवेष्टघृष्टिलेखाचलद्धवलनिर्झरवारिधार: ।
त्वन्नेत्रयो: स्वभरयन्त्रितशीर्षशेषशेषाङ्गवेष्टिततनुर्भ्रममातनोतु ॥ 60॥

स मन्था मन्थरूपो नगो मन्दर: । तव नयनयो: स्वभरेण गौरवेण यन्त्रितानि संकोच्य स्थगितानि शीर्षाणि यस्य स तथाविधो यो शेषो नागराजस्तस्य शेषो-ऽवशिष्टमङ्गं, तेन वेष्टिता वलयिता या तनुस्तस्या भ्रमो भ्रान्तिस्तामातनोतु । यत: कीदृश: ? भुजगप्रभुवेष्टानां वासुकिवेष्टनानां घृष्टिलेखाघर्षणराजयस्तासु चलन्त्यो धवला निर्झरवारीणां धारा यत्र स तथा । शेषो भगवान् किल सिततनुरस्ति । सर्पश्च भारेण चरणादिना वा नियन्त्रितशीर्ष: सन् शेषाङ्गेण नियन्त्रयितारं वेष्टयति, अत एव तद्भ्रम: ॥ 60॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि! मन्दराद्रि: ॥ 61॥

हे सुन्दरि! स मन्दराद्रिस्तवैतेन स्तनयुगेन कृत्वा नीरधिमन्थानोत्थौ सुरेभस्यैरावणस्य कुम्भौ स्मरतु । एतेन पाणिद्वितयेन दिविषद्द्रुमस्य सुरतरो: पल्लवानि स्मरतु । एतेना-स्येन कृत्वा नीरधिमथनोत्थं स्वच्छन्दमिन्दुं स्मरत्विति एतेनेति प्रत्येकं संबध्यन्ते विशेषणानि च सर्वाणि सर्वै: सह संबन्धनीयानि । सादृश्यात् पूर्वानुभूतस्मरणं भवत्येव ॥ 61॥

वैदर्भवचोभिरखिलै: कृतकीर्तिरत्ने हैनुं विनैव धृ(कृ)तनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन् महीभुजि तथानुमतिर्न भेजे ॥ 62॥

तथा भैम्या तस्मिन् वर्ण्यमाने महीभुजि नृपे अनुमतिर्न भेजे । स न प्रमाणित इत्यर्थ: । कयेव कस्मिन् ? मीमांसया वेदवाक्यविचारणया भगवति विश्वपूज्ये

कनककेतकस्य स्वर्णकेतकीकुसुमस्य गोत्रमन्वयो गात्रं यस्यास्तस्याः संबोधनं हे कनककेतकगोत्रगात्रि ! अब्धेः क्षुब्धो मन्थोऽचलः अब्धिक्षुब्धाचलः । तत्र द्वीपे तदारोहणाय सज्जः कृतावधान इवास्ति । कीदृशः ? । सोपानैरारोहणैः शोभते सोपान-शोभि एवंभूतं वपुर्यस्य स तथा । काभिः कृत्वेत्याह । [225.6] अश्मवल्लीनां पाषाण-सन्धिलेखानां छटा धारास्ताभिः । कीदृशीभिः ? भोगेन्द्रस्य वासुकेर्वेष्टनानां शतं, तस्य घृष्टयो घर्षणानि, तैः कृताभिः । प्रसिद्धस्य दण्डनेत्रसादृश्यादेतदनुमेयं क्षुब्धो मन्थः । केचित्तु – अब्धिक्षुब्धा (ब्धः) समुद्रमथनशीलोऽचल इत्याहुः । तदा क्षुभिवाहिस्वनि-ध्वनीत्यादिनेड्निषेधसिद्धस्य विशेषो दर्शितो न भवेत् ॥ ५९ ॥

मन्था नगः स भुजगप्रभुवेष्टघृष्टिलेखाचलद्धवलनिर्झरवारिधारः ।
त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेषशेषाङ्गवेष्टिततनुभ्रममातनोतु ॥ ६० ॥

स मन्था मन्थरूपो नगो मन्दरः । तव नयनयोः स्वभरेण गौरवेण यन्त्रितानि संकोच्य स्थगितानि शीर्षाणि यस्य स तथाविधो यो शेषो नागराजस्तस्य शेषो-ऽवशिष्टमङ्गं, तेन वेष्टिता वलयिता या तनुस्तस्या भ्रमो भ्रान्तिस्तामातनोतु । यतः कीदृशः ? भुजगप्रभुवेष्टानां वासुकिवेष्टनानां घृष्टिलेखाघर्षणराजयस्तासु चलन्त्यो धवला निर्झरवारीणां धारा यत्र स तथा । शेषो भगवान् कित सिततनुरस्ति । स्वशिरस्य भारेण चरणादिना वा नियन्त्रितशीर्षः सन् शेषाङ्गेण नियन्त्रयितारं वेष्टयति, अत एव तद्भ्रमः ॥ ६० ॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन त्रिदिवद्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि ! मन्दराद्रिः ॥ ६१ ॥

हे सुन्दरि ! स मन्दराद्रिस्तवैतेन स्तनयुगेन कृत्वा नीरधिमन्थनोत्थौ सुरेभस्यैरावणस्य कुम्भौ स्मरतु । एतेन पाणिद्वितयेन त्रिदिवद्रुमस्य सुरतरोः पल्लवानि स्मरतु । एतेना-स्येन कृत्वा नीरधिमथनोत्थं स्वच्छन्दमिन्दुं स्मरत्विति एतेनेति प्रत्येकं संबध्यन्ते विशेषणानि च सर्वाणि सर्वैः सह संबन्धनीयानि । सादृश्यात् पूर्वानुभूतस्मरणं भवत्येव ॥ ६१ ॥

वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने हेतुं विनैव धृ(कृ)तनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन् महीभुजि तयानुमतिर्न भेजे ॥ ६२ ॥

तया भैम्या तस्मिन् वार्यमाने महीभुजि नृपे अनुमतिर्न भेजे । स न प्रमाणित इत्यर्थः । कयेव कस्मिन् ? मीमांसया वेदवाक्यविचारणया भगवति विश्वपूज्ये

अमृतांशुमौलौ ईश्वरे। मीमांसा हि कर्तारमीश्वरं नानुमन्यते। इदानीं श्लेषः। भूभुजि तावत्। अखिलैः समस्तैः वैतालिकैर्वचोभिः कृतं कीर्तिरत्नं श्रेष्ठा कीर्तिर्यस्मिन्। ईश्वरे तु वेदैः श्रुतिभिरखिलैः समस्तैर्वचोभिर्वाक्यैः कर्तृभिः कृतकीर्तिरत्ने वेदवाक्यैः सर्वैरपि हि परमार्थतो भगवा-[226. a]-नीश्वर एव कीर्त्यते। अखिलैः खिलरहितैर्वेदैः। वेदानां हि कियानप्यंशः खिलरूपोऽस्ति। मुनिप्रणीतस्य पौरुषेय-भागस्य खिलसंज्ञा तथा भूभुजि कारणं प्रत्युपकाररूपं विनैव धृतो[1] नित्यं प्रति-दिनं परार्थेऽन्यप्रयोजने यत्नो येन। भगवतस्य ये केचन परार्था यत्नास्ते नित्याः शाश्वता हेतुं विनैव तच्छीलत्वादेवेत्यर्थः। स भगवान् सर्वं कुर्वन् सर्वं पश्यन् सर्वं जानन्न किमप्यभिलषति। अपि तु तच्छीलमेवास्य भगवतो यत्तत्र तत्र कर्मणि प्रवृत्तिरिति। परार्थस्तपःसमाधिलक्षणो वा तत्र भगवतो हेतुं विनैव यत्नोऽस्ति। तत्फलानां स्वयमेव पात्रभूतत्वात् ॥६२॥

तस्मादिमां नरपतेरपनीय तन्वीं राजन्यमन्यमथ जन्यजनः स निन्ये।
श्रीभावभावितपदामविमृश्य याच्यामर्थीव निर्वर्त्य विपिनादिव वित्तचिन्तम् ॥६३॥

अथ स जन्यजनः शिबिकावाहकलोकः इमां तन्वीं तस्मान्नरपतेरपनीय विश्लेष्या-न्यं राजन्यं क्षत्रियं निन्ये। कीदृशीं? श्रीभावेन श्रीसत्तया भाविते वासिते पदे यस्यास्ताम्। क इवार्थीव। कां अविमृश्य? याच्याम्। किं कृत्वा? निर्वर्त्य। कस्माद्? विपिनाद्। कम्? वित्तचिन्तं धनप्रसिद्धम्। तां कीदृशीम्? श्रीभावेन लक्ष्मीजननेन हेतुना भावितानि प्रतिपादितानि पदानि स्या (स्या) धन्यानि त्या धन्यानि च यत्र, ताम्। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' [इति] ॥६३॥

देवी पवित्रितचतुर्भुजवामभागा वागालपत्पुनरिमां गरिमाभिरामाम्।
अस्यारिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम् ॥६४॥

पवित्रितश्चतुर्भुजस्य विष्णोर्वामभागो यया सा। देवी वाग् सरस्वती गरिम्णा गौरवेणाभिरामां मनोज्ञामिमां पुनरालपत्। किमालपति स्मेत्याह। अरिषु विषये निष्कृपेण कृपाणेन कृत्वा सनाथः सस्वामिकः पाणिर्यस्य तस्यास्य गुणानां गणं पाणिग्रहाद् विवाहाद् अनुगृहाण प्रसादपात्रतां नय ॥६४॥

द्वीपस्य शाल्मल इति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनाथम्।
अस्मिन् वपुष्मति न विस्मयसे गुणाब्धौ रक्ता निजप्रसवनासिकि। नासि किं वा ॥६५॥

1. B1. कृता

तिलस्य प्रसवः पुष्पं तद्वत् नासा यस्यास्तस्या संबोधनं - हे तिलप्रसवनासिकि ! [1]सुरा एवाम्बु यस्य तेन पाथोधिना समुद्रेण वलयितस्य वेष्टितस्य शाल्मल इति प्रथितस्य द्वीपस्य नाथः पतिः । अस्मिन् गुणानामब्धौ वपुष्मति वपुष्मत्यपि न विस्मयसे, न रक्ता आसक्ता वा, किं नासि । काक्वा अपि तु, यास्मिन् विषये विस्मयो युज्यते तु रागश्चेत्यर्थः । सुरा वारुणी अम्बुजलं यत्र स सुराम्बुः ॥६५॥

विप्रे पिबत्युद-[२.२६-८]-धिमेकतमं त्रसत्सु यस्तेषु पञ्चसु विभाय
(न) सीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं सार्धं विधेहि मधुरा मधुपानकेलीः ॥६६॥

भो भैमि ! विप्रे अगस्त्यमुनौ ब्राह्मणे एकतमं प्रकृष्टमेकमुदधिं पीतवति पिबति सति, तेषु पञ्चस्वपरेषु त्रसत्सु सत्सु यः सीधुसिन्धुः मद्यसमुद्रो न विभाय सीधुपाने विप्रस्य सौत्रामणीमिष्टिं विना सर्वथानधिकारित्वात् । स्पर्शमात्रेऽपि तस्य विप्राणां प्रायश्चित्तापत्तनाच्च । तस्मिन् सिन्धौ त्वमनेन च सार्धं निजेन सखीसमूहेन सार्धं मधुराः प्रीतिदाः मृष्टा मधुपानकेलीर्विधेहि । क्षत्रियजातेस्त्वधिकारस्तत्रास्त्येव ॥६६॥

द्रोणः स तत्र वितरिष्यति भाग्यलभ्यसौभाग्यकार्मणमयीमुपदां गिरिस्ते ।
तद्दीपदीप इव दीप्तिभिरोषधीनां चूला(डा)मिलज्ज्वलद्कज्जलदर्शनीयः ॥६७॥

तत्र द्वीपे स द्रोणो गिरिः तवोपदामुपायनं करिष्यति वितरिष्यति । कीदृशीम् ? । सौभाग्यकार्मणमयीं सौभाग्याय कार्मणानि मूलकर्माणि तन्मयीम् । अत्र हि बहूनि कार्मणार्हाणि औषधीनां मूलानि सन्ति । तत्र च तानि नव सुखेन घटिष्यन्ते । औषधीनां शल्याविशल्यामृतसंजीवनीप्रभृतीनां दीप्तिभिः कृत्वा तस्य द्वीपस्य दीप इव । कीदृश इति दीपधर्ममाह । चूडायां शिखरेषु मिलद्भिः जलदैरेव कज्जलेन दर्शनीयो रम्यः । सर्वा महाप्रभावा महौषधयो द्रोणाद्रौ सन्ति । अत एव हनुमता लक्ष्मणशक्ति-समुद्धरणाय तस्य शिखरमानीतं रामायणे वर्णितम् । रात्रौ चौषधयः प्रज्वलन्तीति हिमाचलवर्णनादौ विदितमेव । मूलकर्म तु कार्मणम् ॥६७॥

तद्द्वीपलक्ष्मपृथुशाल्मलितूलजालैः
सौणीतलै मृदुनि मारुतचारुकर्णैः ।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरससारसकोषमृद्वि ! ॥६८॥

1. B. om. सुरा --- यस्य तेन, but reads - अयं सुराम्बुना पाथोधिना.

सरसमम्लानं यत्सारसं सरसिजं, तस्य कोषो गर्भस्तद्वन्मृद्वी सुकुमारा, तस्याः संबोधनं हे सरससारसकोषमृद्वि। लीलाविहारसमये विलासविचरणक्षणे क्षोणीतले भूपृष्ठे तव चरणार्पणानि पादविन्यसनानि योग्यानि। कीदृशे क्षोणीतले इत्याह। मृदुनि मृदुलैः कैः? तस्य द्वीपस्य लक्ष्म चिह्नं पृथुर्विशालो यः शाल्मलिनामा तरुस्तस्य तूलानां आलैः समूहैः। कीदृशैः? मारुतेन चारु भव्यं यथा स्यादेवं विप्रकीर्णैरितस्ततो विक्षिप्य प्रसारितैः। शाल्मलिफलशिम्बीषु तूलं प्रसिद्धमेव। ताश्च पक्वशुष्काः स्वयमेव विदार्यन्ते। तत् तूलानि वायुविकीर्णानि तद् भूमावितस्ततः प्रस- [ ४२७ ] रन्तीति प्रसिद्धमेव॥६८॥

एतद्गुणश्रवणकालविजृम्भमाणतल्लोचनाञ्चलनिकोचनसूचितस्य।

भावस्य चक्रुरुचितं शिबिकाभृतस्ते तामेकतः क्षितिपतेरपरं नयन्तः॥६९॥

ते शिबिकाभृतस्तां भैमीमेकतः क्षितिपतेः सकाशादपरं नयन्तः सन्तो भावस्याभिप्रायस्यार्थात् तस्या एव यदुचितं तच्चक्रुः। कीदृशस्य भावस्य? एतस्य क्षितिपतेर्गुणानां श्रवणकाल एव विजृम्भमाणमुल्लसद्यत्तस्या लोचनाञ्चलयोर्नेत्रप्रान्तयोर्निकोचनं संकोचनं, तेन सूचितो ध्वनितस्तस्य। हृदयाभिप्रायसूचकचेष्टाविशेषो भावः॥६९॥

तां भारती पुनरभाषत नन्वमुष्मिन् काश्मीरपङ्कनिभलग्नजनानुरागे।

श्रीखण्डलेपमयदिग्जयकीर्तिराजिराजद्भुजे भज महीभुजि भैमि! भावम्॥७०॥

तां भैमीं भारती पुनरभाषत। किमभाषत तदाह। ननु भो भैमि! अस्मिन् महीभुजि नृपे भावं भज, मनो बधान। कीदृशे? काश्मीरपङ्कनिभेन कुङ्कुमकल्कव्याजेन लग्नो जनानामनुरागो यस्मिन् तथा श्रीखण्डस्य मलयजस्य लेप उपदेहस्तेन निर्वृत्ते श्रीखण्डलेपमय्यौ ते च ते दिग्जयकीर्ती राजी लेखा ताभ्यां राजन्तौ शोभमानौ भुजौ यस्य तस्मिन्निति। यथास्थाने सर्वाङ्गे वा कुङ्कुमानुलेपः बाह्वोश्च श्रीखण्डतिलकबहलभावसूचनम्॥७०॥

द्वीपं द्विपाधिपतिमन्दपदे! प्रशास्ति

प्लक्षोपलक्षितमयं क्षितिपस्तदस्य।

मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या

साक्षाद्यथैव कमला यमलार्जुनारेः॥७१॥

द्विपाधिपतिर्गजेन्द्रस्तस्येव मन्दे मन्थरे पदे यस्यास्तस्याः सम्बोधनं- हे द्विपाधिपतिमन्दपदे! अयं क्षितिपः प्लक्षवृक्षोपलक्षितं द्वीपं प्रशास्ति। प्लक्षद्वीपाधिपतिरयमित्यर्थः।

तत् कारणादस्य मेधातिथिनाम्नः सृष्टसौख्या विहितपरमनिर्वृतिः सती स्फुर समुल्लास।
कथम्? यथैव कमला लक्ष्मीर्यमलार्जुनारेर्विष्णोरुरसि साक्षात् प्रत्यक्षा सृष्टसौख्या
स्फुरति। यमलार्जुनौ वृक्षौ मथुरायां शैशवे कृष्णेनोन्मूलितौ तन्मूलमिदं भगवतः
कृष्णस्य नाम ॥७१॥

प्लक्षे महीयसि महीवलयातपत्रे तत्रेक्षिते खलु तवापि मतिर्भवित्री।
खेलां विधातुमधिशाखविलम्बिदोलालीलाखिलाङ्गजनताजनितानुरागैः ॥७२॥

हे भैमि! महीवलयस्यातपत्रे महीयसि प्लक्ष नाम्नि तरौ तत्र द्वीपे ईक्षिते सति खलु
नूनं तवापि खेलां विधातुं क्रीडां कर्तुं मतिर्भवित्री भाविनी। कीदृशे? अधिशाखं
शाखासु विलम्बिन्यो या दोलाः प्रेङ्खास्ताभिः कृत्वा लीलाखिलाङ्गजनता जनसमूहस्तेन
कृत्वा जनितोऽनुरागो येन तस्मिन्[८२७.७]न्। तत्र प्रतिवासरं सुखिता जनता दोला-
-खेलसुखमनुभवति। तवापि तां तथा प्रेङ्खन्तीं दृष्ट्वा प्रेङ्खणाय समुत्कण्ठा भविष्यती-
-त्यर्थः। स्त्रीणां च स्वभावोऽयम्। यदेकामपि नृत्यन्तीं गायतीं खेलन्तीं व्रतमाचरन्तीं
वा दृष्ट्वाऽन्यस्याः समुत्कलिका भवतीति। अस्य प्लक्षस्यैतत् स्वरूपं पुराणे दृष्टमस्ति॥
७२॥

पीत्वा तवाधरसुधां वसुधासुधांशुर्न श्रद्दधातु रसमिक्षुरसोदधाराम्।
द्वीपस्य तस्य दधतां परिवेषवेषं सोऽयं चमत्कृतचकोरचलाचलाक्षि! ॥७३॥

[1]यं वसुधासुधांशुर्भूश्चन्द्रो नृपः। इक्षुरसोदधारां रसं स्वादम्। चमत्कृतश्चासौ चकोरस्य
तस्येव चलाचले चञ्चले अक्षिणी यस्यास्तस्याः सम्बोधनं क्रियते-हे चमत्कृत-
-चकोरचलाचलाक्षि! सोऽयं वसुधासुधांशुर्भूश्चन्द्रो नृपः। इक्षुरसोदधारां स्वादं न
श्रद्दधातु। न श्रद्धाविषयं करोतु तस्मै न स्पृहयत्वित्यर्थः। किं कृत्वा? तवाधरसुधां
पीत्वा। सुधापानानन्तरमन्यस्मिन् पेयद्रव्ये श्रद्धा न भवतीति युक्तमेव। इक्षुरस
एवोदकं यत्र स इक्षुरसोदः। उदकस्योदः। केचिदुदकपर्याये नियतप्रयोगविषयमुदशब्दमाहुः॥
७३॥

सूरं न सौर इव नेन्दुमवीक्ष्य तस्मिन्नश्नाति यस्तदितरत्रिदशानभिज्ञः।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव दर्शेऽश्नतोऽपि न भवत्यवकीर्णिभावः ॥७४॥

इन्दौ भक्तिरस्यासावैन्दवः। तस्यैन्दवस्यैन्दुभक्तस्य जनस्य दर्शे अमावास्याया-
-मश्नतः भुञ्जानस्य सतः अवकीर्णिभावः क्षतव्रतत्वं नास्तु। कया अश्नत
इत्याह। भवदास्यनिरीक्षयैव तव मुखं हि साक्षादिन्दुः, तं दृष्ट्वा वेद(देव)भुक्तं चन्द्र-
-मेव दृष्ट्वा भुक्तम्। तस्य कस्येत्याह। य ऐन्दवो जनस्तस्मिन् द्वीपे वर्तमान इन्दुमवीक्ष्य

[1]. श्री. रम.: यं — स्वादम्।

नाश्नाति । यतस्तस्मादिन्दोरितरस्य त्रिदशस्य देवस्यानभिज्ञोऽकुशलः तन्नत्या अनाश्यन्नेव देवं जानाति । क इवेन्दुमवीक्ष्य नाश्नातीत्याह । सौरः सूरमिव । सूरे सूर्ये भक्तिरस्यासौ सौरः । स यथा सूरमवीक्ष्य नाश्नाति । अथवा अन्यथा व्याख्येयम् । यथा तस्यैन्दवस्य भवदास्यनिरीक्ष्य(क्ष)यैव चन्द्रभ्रान्त्या दर्शेऽश्नतोऽपि अवकीर्णिभावो न भवतु । अपि तु भवत्येव । अवकीर्णी क्षतव्रतः ॥७४॥

उत्सर्पिणी न किल तस्य तरङ्गिणी या त्वन्नेत्रयोरहह तत्र विपासि(शि) जाता ।
नीराजनाय नवनीरजराजिरस्तामोजसानुरज्य राजनि राजमाने ॥७५॥

हे भैमि ! अहह खेदे । ओजसा कृत्वा राजमानेऽस्मिन् राजनि नृपे अनुरज्य, अनुरक्ता भव । तत्र तस्यां विपासि(शि) नद्यां जाता नवनीरजराजिः प्रत्यग्रकमल[श्रेणि]माला त्वन्नेत्रयोर्नीराजनायास्तां तिष्ठतु भवत्वित्यर्थः । अस्मिन् वृते तवैतत् सुलभमित्यर्थः । तत्र कुत्रेत्याह । या किल तस्य द्वीपस्य तरङ्गिणी नदी नोत्सर्पिणी न वहनशीला । अपि तु तडागवत् स्थिरनीरा । नीरस्य शान्त्युदकस्याजनं क्षेपो यत्र तन्नीराजनमारात्रिकमिति लोकप्रसिद्धम् । विपाशा तु विपाट्(श्) स्त्रियाँ इति विपाशशब्दः ॥७५॥

एतद्यशोभिरविलेऽम्बुनि सन्तु हंसा दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं नानार्थकोशविषयोऽद्य मृषोधमस्तु ॥७६॥

एतस्य राज्ञो यशोभिरखिले समस्तेऽम्बुनि जले दुग्धीकृते सति, हंसास्तयोरम्बुदुग्धयोर्व्यतिभेदे विवेचने मुग्धा अज्ञा भवन्तु । नीराभावात् क्षीरनीरविवेचनवैदग्धी हंसानां विरमत्वित्यर्थः । किञ्च । क्षीरे पदे पयस्यपि पदे विषये द्वयवाचिभूयमम्बुदुग्धार्थद्वयवाचित्वं नानार्थकोशविषयोऽनेकार्थाभिधानस्थानं मृषोऽद्यं मृषा(षा) कथनीयमस्तु । अनेकार्थाभिधाने(ने) हि क्षीरपयःपदे दुग्धाम्बुनोरुपदिष्टे स्तः, यथा क्षीरमप्सु च । 'पयः क्षीरं पयोऽम्बु च' इति । अम्बुनि च दुग्धीभूते तन्मृषोद्यमेव ॥७६॥

ब्रूमः किमस्य नलमप्यलमाजुहूषोः कीर्तिः स चैष च समादिशतः स्म कर्तुम् ।
स्वद्वीपसीमसरिदीश्वरपूरपारवेलाचलाक्रमणविक्रममक्रमेण ॥७७॥

हे भैमि ! अस्य राज्ञः कुलमत्यर्थं नलमप्याजुहूषोः स्पर्धया आकारयितुमिच्छोः । किं ब्रूमः ? । ईदृशोऽयं शक्तो यन्नलमप्याहूयते । कथं नलं स्पर्धया प्रार्थत इत्याह । स च नलः, एष च राजा, द्वावपि द्वे कीर्ती समादिशतः स्म । निजां निजां कीर्तिं समादिष्टवन्तौ । किं समादिशतः स्म इत्याह । स्वद्वीपस्य सीमनि यः सरिदीश्वरः

-स्त- -लस्त-
समुद्रस्तस्य पुरो जलराशिस्तस्य पारे यो वेलाचलः तस्य क्रमणमधिष्ठानं, तस्य विक्रमोऽतिशयशक्तिता, तेन ॥७७॥

अम्भोजगर्भरुचिरार्थे विदर्भसुभ्रूस्तं गर्भरूपमपि रूपजितत्रिलोकम् ।
वैराग्यरूक्षमवलोकयति स्म भूपं दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥७८॥

अथाम्भोजगर्भवत् कमलकोशवत् रुचिरा गौराङ्गी विदर्भसुभ्रूस्तं भूपं वैराग्येण विरक्ततया रूक्षमस्निग्धं यथास्यादेवमवलोकयति स्म । कीदृशम् ? गर्भरूपमपि बालकमपि रूपेण कृत्वा परिभूतत्रिभुवनम् । केव कमित्याह । पुरत्रयरिपोर्दृष्टिः पुष्प-
-चापमिवेति[1] तस्या विशेषणं (विशेषणं), तस्याः (-स्या) सह संबन्ध्य भूपविशेषणं च क्रमेण । गर्भरूपमिति पश्चिमदेशप्रसिद्धबालकनामानुकारः । तत्र हि षोडश-
-[२२४-७]-वर्षदेशीयो बालः गर्भरूप इत्युच्यते । यथा महाराष्ट्रे अण्डीर इति ॥७८॥

ते तां ततोऽपि चकृषुर्जगदेकदीपादंसस्थलस्थितसमानविमानदण्डाः ।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां सोत्कण्ठकैरववनीमुकुलप्ररोहाः ॥७९॥

ते अंसस्थले स्थितः समानस्तुल्यो विमानस्य शिबिकाया दण्डो येषां ते शिबिका-
-भृतः ततस्तस्मादपि जगदेकदीपात् नृपात् तां चकृषुरपगमयन्ति स्म । क इव ? कस्मात् ? काम् ? सोत्कण्ठा चासौ कैरवाणां वनी, तस्याः मुकुलप्ररोहाः पुष्पाङ्कुराः, चण्डद्युतेः सूर्यात् सकाशादुदयिनीमुद्गत्वरीमिन्दुलेखामिव । कैरविण्या इन्दुरेव जीवितुं हेतुरिति मुख्यस्तया तदुपादानं, जनेत्राणां चकोराणां चापि मुकुलप्ररोहास्तत्र हेतुरस्त्येव राज्ञो जगत्येकदीपात् चण्डद्युतेश्च[2] ॥७९॥

भूपेषु तेषु न मनागपि दत्तचित्ता विस्मेरया वचनखेलतया तयाथ ।
वाणीगुणोदयतृणीकृतपाणिवीणानिक्वाणया पुनरभाणि मृगेक्षणा सा ॥८०॥

वाणीगुणानां माधुर्येण[3] प्रसादान्तामुदयेनाविर्भावेनातृणं सत् तृणं कृत्वा (-तः)
-ता
तृणीकृता भृशमवगणिता (-ता) पाणौ वर्तमाना वीणा, तस्या निक्वाणो[4] यया, तादृश्या । विस्मेरया साश्चर्यया
-था
वचनखेलतया सरस्वत्या सा मृगेक्षणा भैमी, तेषु पूर्वेषु [5]भूपेषु मनाक् स्तोकमपि न दत्तचित्ता सती, पुनरभाणि भूयो भणिता ॥८०॥

यन्मौलिरत्नमुदितासि स एष जम्बूद्वीपस्त्वदर्थमितितैर्युवभिर्विभाति ।
दोलायितेन बहुना भयभीतिकम्प्रः कन्दर्पलोक इव स्वात्पतितस्फुरित्वा ॥८१॥

---

1. B. चापमपि. 2. B. -द्युतिश्च. 3. B. माधुर्यौजः 4. B. om. तस्या निक्वाणो 5. B. भूतेषु

हे भैमि ! एष जम्बूद्वीपस्त्वदर्थमिलितैर्भवन्निमित्तसङ्गतैर्युवभिः कृत्वा विभाति, स क इत्याह। यस्य मौलिं रत्नशिखामणिमण्डने त्वमुदितासि जयन्ती वर्तते। उत्प्रेक्ष्यते। [1]भयभीतिकम्प्रत्रिनयनसा[2]ध्वस चञ्चलः कन्दर्पलोकः कामविषय इव बहुना समधिकेन दोलायितेन दोलनेन स्याद् गगनात् भ्रुटित्वा पतितः। कौतुकमात्रं क्वापि श्राम्योक्तिर्न दूषणम्। अन्यदप्यन्तरिक्षे शिक्यादौ वर्तमानं दधिघृतभाण्डादिवस्तु बिडालादिना भूयो भूयः प्रकम्पितं सद् बहुना दोलायितेन त्रुटित्वा पतति ॥८१॥

विष्वग्वृतः परिजनैरयमन्तरीपैस्तेषामधीश इव राजति राजपुत्रि !।
हेमाद्रिणा कनकदण्डमहातपत्रः कैलासरश्मिचयचामरचक्रचिह्नः ॥८२॥

हे राजपुत्रि ! अयं जम्बूद्वीपः विष्वक् समन्ततः परिजनैः परिवारलोकैरिव अन्तरीपै-[२२१.क]-रपरैर्द्वीपैः परिवृतो वेष्टितः सन् तेषामन्तरीपाणामधीशोऽधीश्वर इव राजति। कीदृश इत्यधीशधर्ममाह। हेमाद्रिणा कृत्वा कनकस्य दण्डो यस्य तत् कनकदण्डमेवंभूतमातपत्रं यस्येत्यवयवदर्शनादवयविप्रतीतिः। तथा कैलासस्य रश्मि-चय एव चामराणां चक्रं निकुरम्बं चिह्नं यस्येति। अन्योऽप्यधीश ईदृश एव भवति। "राजा तु प्रणताशेषमण्डलः स्यादधीश्वरः" ॥८२॥

एतत्तरुस्तरुणि ! राजति राजजम्बूः स्थूलोपलानिव फलानि विमृश्य यस्याः।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्तियूथानि केन तरुमारुरुहुः पथेति ॥८३॥

हे तरुणि ! एतस्य जम्बूद्वीपस्य तरुश्चिन्हैर्वृक्षो राजजम्बूर्नाम राजति। स्थूलोपला-निव पृथुलग्रावनिभानि यस्य राजज[3]म्बोस्तरोः फलानि विमृश्य सिद्धस्त्रियः प्रियं प्रतिमितीदं निगदन्ति ब्रुवन्ति इति कथमित्याह। भोः प्रिय दन्तिनां यूथानि केन पथा कृत्वा तरुमारुरुहुः। पुराणे करिप्रमाणानि तस्य फलानि वर्णितानि सन्ति, सिद्धानामेव तत्र गतिरिति न व्यापारकथनम्। राजयोग्यफला जम्बू राजजम्बूः स्त्रियाम्। अथवा सामान्यजम्ब्वोऽस्याः प्रशस्यफलत्वात् राजजम्बूमिति नाम ॥८३॥

जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नापि सा तव रुचा विजितश्रीर्यस्याः।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बुर्जम्बूसरिद्वहति सीमनि कम्बुकण्ठि ! ॥८४॥

हे कम्बुकण्ठि ! अस्य जम्बूद्वीपस्य सीमनि सुधाविधाम्बुरमृतसमजला जम्बूसरित् जम्बूनदी वहति। कीदृशी ?। तस्य जम्बूतरोर्जाम्बवानां यो द्रवो रसो (रस्) तद्भवा तज्जा।

1. B1 भवतीति. 2. B1 om. साध्व- 3. B1 -जम्ब्वा-

सा केत्याह। यस्या जम्बूसरितः कृत्स्ना समग्रापि मृत्स्ना प्रशस्ता मृत्तिका तव रुचा कान्त्या विजितजित् तिरस्कृतवर्णसम्पत् जाम्बूनदं जगति विश्रुतिमेति प्रसिद्धिं याति। जाम्बूनदमिति जम्बूनदीभवत्वात् कनकमित्यर्थः। फले जम्ब्वा जम्बुः स्त्रीजम्बू जाम्बवम्। कम्बुकण्ठी कम्बुग्रीवा त्रिरेखग्रीवेति यावत् ॥८४॥

अस्मिन् जयन्ति जगतीपतयः सहस्रमस्रास्रुसार्द्ररिपुतद्दुर्जितेषु तेषु।

रम्भोरु! चारु कतिचित्तव चित्तबन्धिरूपान्निरूपय मुदाहमुदाहरामि ॥८५॥

भो रम्भोरु! अस्मिन् जम्बूद्वीपे सहस्रसङ्ख्या जगतीपतयो राजानो जयन्ति उदिताः सन्ति। तेषु अस्रास्रुसार्द्ररिपुतद्दुर्जितेषु मध्ये कतिचित् कियन्तोऽपि तव चित्तबन्धिरूपान् चारु रुचिरं यथा स्यादेवमहं मुदा प्रीत्यैवोदाहरामि निदर्शयामि त्वं निरूपय पश्येति सामान्योपक्रमे। अस्रं चाश्रु चास्राश्रुणी, ताभ्यां यथासङ्ख्यं सार्द्राः [२२१.६] विलग्ना रिपवस्तद्दुर्जिता अरिस्त्रियश्च येषां तेषु। अरयः शस्त्रैः क्षतत्वादस्रेण रुधिरेण सार्द्राः तद्दुर्जिता हतपतित्वादश्रुभिः रोदनजनयनजलैः सार्द्रा इत्यर्थः। चित्तं बध्नातीत्येवंशीलं रूपं येषां तान् ॥८५॥

प्रत्यर्थियौवतवतंसतमालमालोन्मीलत्तमःप्रकरतस्करशौर्यसूर्ये।

अस्मिन्नवन्तिनृपतौ गुणसन्ततीनां विश्रान्तिधामनि मनो दमयन्ति! किं ते ॥८६॥

हे दमयन्ति! अस्मिन् गुणसन्ततीनां विश्राम-(विश्रान्ति-)धामनि अवन्तिनृपतौ मालवेश्वरे किं तव मनोऽस्ति। गुणानां सन्ततयः प्रतानानि तेषां विश्रान्तिधाम खेदापनोदस्थानं तस्मिन्। कीदृशे प्रत्यर्थिनां द्विषतां यौवतं युवतीसमूहस्तस्य वतंसाः कर्णाभरणानि यास्तमालदलानां मालाः स एवोन्मीलज्जृम्भमाणः यस्तमःप्रकरो ध्वान्तनिकुरम्बस्तस्य तस्करोऽपहारकः। शू(शौ)र्यं सुभटत्वमेव सूर्यो यस्य तस्मिन्। पर्यवसन्नोऽर्थोऽत्रामित्रवधः ॥८६॥

तत्रानुतीरवनवासितपस्विसिप्रा सि(शि)प्रा तवोर्मिभुजया जलकेलिकाले।

आलिङ्गनानि ददती भविता वयस्या हास्यानुबन्धरमणीयसरोरुहास्या ॥८७॥

तत्रावन्तिषु विषये शिप्रा नाम नदी तव तोयक्रीडावसरे ऊर्मिभुजया कृत्वा आलिङ्गनानि ददती सती तव वयस्या सखी भविष्यति। कीदृशी? हास्यस्य विकाश(स)स्यानुबन्धेन स्थैर्येण रमणीयं सरोरुहमेवास्यं मुखं यस्याः सा। सखीपक्षे सरोरुहवदिति गम्यम्। अन्यच्च कीदृशी? अनुतीरं तीरसमीपे यद्वनं तत्र वासिनः तपस्विनो

विप्राख्य यस्या इति स्वरूपकथनेन पावनत्वकथनम् । अन्यापि सखी स्वत्येव-
-भयालिङ्गनं ददाति । तत्रेति समासछन्नाजन्ययन्तीन् स्पृशति ॥८७॥

अस्याधिशय्य पुरमुज्जयिनीं भवानी जागर्ति या सुभगयौवनमौलिमाला ।
पत्यार्धकायघटनाय मृगाक्षी ! तस्याः शिष्या भविष्यसि चिरं वरिवस्ययापि ॥८८॥

हे मृगाक्षि ! अस्यावन्तिविषयस्योज्जय(यि)नीं नाम पुरं नगरीमधिशय्याधिष्ठाय
या सुभगयौवनमौलिमाला भवानी गौरी जागर्ति, अतिप्रकटास्ति । त्वं वरिवस्यया
शुश्रूषयाऽपि तस्या भवान्याः शिष्या विद्योपदेशपात्रं भविष्यसि । किमर्थम् ?।
पत्या सह कायार्धघटनाय देहार्धयोजनाय । एतां च विद्यां भगवती भवानी सम्यक्
वेत्तीति[1] प्रसिद्धमेव । सुभगयुवतीसमूहमौलिमालेव तस्याश्चरणयोः शूत्रधारणात् ।
अस्येति राज्ञो वा ॥८८॥.

निःशङ्कमङ्कुरितता रतिवल्लभस्य देवः स्वचन्द्रचरणामृतसेचनेन ।
तत्रावलोक्य सुदृशां हृदयेषु रुद्रस्तद्देहदाहफलमाह स किं न विद्मः ॥८९॥

स भगवान् रुद्रो [230. a] देवः स्वचन्द्रकिरणामृतसेचनेन सुदृशां हृदयेषु
वर्तमानस्य रतिवल्लभस्य कामस्य निःशङ्कं यथास्यात्तथम् । अङ्कुरिततामवलोक्य न
विद्मस्तद्देहदाहस्य किं फलमाह । न विद्म इत्यस्य सामान्येनोपक्रान्तस्य कर्मता
वाक्यार्थस्यैव । अङ्कुरः संजातो यस्य सोऽङ्कुरितस्तस्य भावोऽङ्कुरितता, ताम् ।
स चेद् दग्धोऽपि भूयोऽङ्कुरितस्तर्हि तद् देहदाहश्रमो वृथैव देवस्य । रुद्र इति
नाम साभिप्रायं क्रोधाधिक्यसूचकम् । स्वचन्द्रकिरणनाममृतसेचनेन दग्धं प्ररोहत्येव ।
अन्यदपि तरुलतागुल्मादि अमृतोदकस्य सेचनेनाङ्कुरितं भवति । तत्र भगवतश्चन्द्र-
कलावतंसस्य सांनिध्यात् सन्तः तं कामः । कामिनीनां मनः सुसम्भीलतीति सूचितम् ॥
८९॥

आगःशतं विदधतोऽपि समिद्धकामा नाधीयते परुषमक्षरमस्य वामाः ।
चान्द्री[2] न तत्र हरमौलिशयालुरेकाऽनध्यायहेतुतिथिकेतुरपैति रेखा ॥ ९०॥

अस्य राज्ञः आगसामपराधानां शतं विदधतः कुर्वतोऽपि सतः वामा वध्वः समृद्ध-
-कामत्वात् परुषं कर्कशं अक्षरं वर्णं नाधीयते, न पठन्ति । यतस्तत्र स्थाने हरमौलि-
-शयालुरेकाऽनध्यायतिथेः प्रतिपदः केतुश्चिह्नं एका चान्द्री लेखा नापैति, न विश्लिष्यति ।
शुक्लप्रतिपच्चिह्नं रेखामात्रम् । तच्चिह्नं स च वासरो[3] मतोऽध्याये । तत्त्वतस्तु चन्द्रकला-
(-शमक्षरं — interlinear above कर्कशं अक्षरं)

1. B1. प्रीति. 2. B. शान्द्री. 3. B1, B. मनन ध्यायः

-बलेन मनोजन्मनो बलवत्ता परुषाक्षरानध्ययने हेतुः। लिङ्गलिङ्गिनः प्राप्तिर्भवत्येव। हरमौलौ शयालुः स्थास्नुः। अनध्यायोऽनध्ययनं तत्र हेतुर्या तिथिस्तस्य केतुः॥९०॥

भूपं व्यालोकत न दूरतरानुरक्तं सा कुण्डिनावनिपुरंदरनन्दनी तम्।
अन्यानुरागविरसेन विलोकनाद्वा जानामि सम्यगविलोकनमेव रम्यम्॥९१॥

तं पूर्वोक्तं भूपं दूरतरमतिशयेनानुरक्तं लग्नचित्तमपि सन्तं सा कुण्डिनावनि-पुरन्दरनन्दनी भैमी न व्यलोकत। अथवा युक्तं चैतत्। अन्यानुरागविरसेन कृत्वा यद्विलोकनं तस्मात् सकाशात् जानामि। अव(वि)लोकनमेव सम्यग्रम्यम्। यथा-वच्चारु। अन्यस्मिन्ननुरागस्तद्वशाद् विरुद्धो रसो विरसो वैरस्यं तेन॥९१॥

भैमीङ्गितानि शिबिकामधरे वहन्तः साक्षान्न यद्यपि कथञ्चन जानते स्म।
जग्मुस्तथापि सविधस्थितसम्मुखीनभूपालभूषणमणिप्रतिबिम्बितेन॥९२॥

शिबिकामधरे वहन्तः पुरुषाः भैम्या इङ्गितानि यद्यपि कथंचित् साक्षात् प्रत्यक्षप्रमाणेन न जानते[1] स्म। तथापि जग्मुर्गताः। केन कृत्वा? सविधे समीपे स्थिता ये संमुखी(खी)नाः सम्मुखीभूता भूपालास्तेषां भूषणमणिषु यत्प्रतिबिम्बितं प्रतिफलितं अर्थाद् भैमीङ्गितानाम्।[2] तेन सम्मुखास्तिष्ठन्ती-[२३०.८]-ति सम्मुखीनाः, अनुमानेन गता इत्यर्थः। 'शिबिका याप्ययानं स्यात्'। दण्डिकेति लोके प्रसिद्धाः। सुखासनमिति च मालवदेशादौ तद्भेद एव। इयं तु दमयन्त्याः शिबिका काचन विपुला महती च युक्तितः परिकल्पिताऽस्ति॥९२॥

भैमीमवापयत जन्यगणस्तदन्यं गङ्गामिव क्षितितलं रघुवंशदीपः(-वीरः)।
गाङ्गेयपीतकुचकुम्भयुगां च हारचूडासमागमवशेन विभूषितां च॥९३॥

जन्यानां विमानवाहानां गणो भैमीं तस्मात् प्राकरणिकादन्यं तदन्यं नृपमवाप-यदवयत्। क इव कां कमिवेत्याह। रघुवंशवीरो भा(भ)गीरथो नाम नृपः गङ्गां क्षितितलमिव। इदानीं भैमीगङ्गयोः श्लेष द्वारा साम्यमाह। भैमीं कीदृशीम्? गाङ्गेयेन भीष्मेण पीतमुपयुक्तदुग्धं कुचकुम्भयुगं यस्याः तां तथा भैमीम्। हारो मुक्तासरः चूडा उरस्याभरणविशेषस्तयोः समागमवशेन प्राप्तिबलेन विभूषिता, मण्डिता। वशः कान्तिर्वा वशः कान्ताविभ्यु[3]पिधानात्। गङ्गा च हरस्येयं हारी सा चासौ चूडा च हारचूडा शिवशिखा, तया समागमः संयोगस्तद्वशेन तदधीनतया। विशिष्टयां भुवि उषिता विहितवासा नाम।

1. ङ. जाते. 2. B1. तत्र. 3. B1, ङ. -पिधानात्

भगवतः शम्भोः शिरः खलु विशिष्टा भूमिः ततो भ्रष्टा सती भुवि धरायां विशेषेणोषिता भगीरथस्य वीरत्वं गङ्गानयनलक्षणस्य सुदुष्करस्य कर्मणः सत्वात्। गाङ्गेयो भीष्मः स गङ्गायास्तनयः। तनयश्चावश्यं मातुः स्तनौ पिबति। अत्राख्याने हेतू रामायणमहाभारतयोः प्रसिद्धः ॥९३॥

तां मत्स्यलाञ्छनदराञ्चितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा।
क्रीडाजडे ! किमपि सूचय चेतसा चेत्
क्रीडारसं वहसि गौडविडौजसीह ॥९४॥

मत्स्यलाञ्छनस्य स्मरस्य दरमीषदाञ्चितमाकृष्टं यच्चापं तस्य भाश्छवि-स्तया नीराजिते कृतनीराजने भ्रुवौ यस्यास्तां तथाविधां तां भैमीं भाषितेशा भगवती सरस्वती पुनरभाषत। भूयः किमब्रवीत् तदाह। हे क्रीडाजडे! त्रपास्तमिते! चेद् यदि इहास्मिन् गौडविडौजसि गौडेन्द्रे क्रीडारसं केलिरागं चेतसा वहसि। तर्हि किमपि मनागपि सूचय चेष्टया संक्षेपतः कथयेति। दराञ्चितेत्यत्र दरा-[2]ञ्छितमित्याच्छ आयाम इत्यस्य रूपमत्र युक्तम्। तथा सत्यनुप्रासार्थयोः सम्पुष्टः(?)॥९४॥

एतद्यशोभिरमलानि कुलानि भासां तथ्यं तुषारकिरणस्य तृणीकृतानि।
स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ॥९५॥

एतस्य नृपस्य यशोभिस्तथ्यमवितथमेव तुषारकिरणस्येन्दोर्भासां कान्तीनाममलानि लाञ्छनेनाच्छुप्तानि कुलानि स-[231·b]न्ततिरूपाणि अतृणानि तृणानि सन्ति तृणीकृतानि। तृणं दूर्वादि तद्रूपतां प्रापितानि। अतश्च तत्र तुषारकिरणे सुधाम्बु-नोऽमृतोदकस्य सिन्धौ समुद्रे नद्यां वा तत एव हेतो रङ्कुर्मृगस्तृणाहारः स्थाने युक्तं वसति। कस्मात् तेषां चन्द्रकान्तितृणानां वनी निष्पन्ना कैदारिका तस्याः कवलः कवलनं तस्याभिलाषात् लाभलोभेन। तत्रापूर्वममृतवन्मृष्टं तृणं साक्षाद-मृतमेवाम्बु स्वल्पतीव सुलभं मृगाश्च प्रायेणैव (त)देव कामयन्ते। तच्च तस्तु तृणीकृतानि लक्षणया दूरमवजतानीत्यर्थः ॥९५॥

आलिङ्गितः कमलवत्करकस्त्वयाऽयं श्यामः सुमेरुशिखयेव नवः पयोदः।
कन्दर्पमूर्धरुहमण्डनचम्पकस्रग्धामत्वदङ्गरुचिकञ्चुकितश्च कास्तु ॥९६॥

---

1. B· क्रीडा– 2. B· –ञ्छित–

हे भैमि ! अयं नृपः श्यामः श्यामलः नवस्तरुणः कमलवत् पद्मवत् कोमलौ करावेव करकावनुकम्पितौ वा पाणी यस्य कमलवत् करकः त्वयाऽऽलिङ्गितः सन् चकास्तु भृशं शोभताम् । यतः कीदृशः ? कन्दर्पस्य मूर्धरुहाणां मण्डनं या चम्पककुसुमानां स्रक् माला तस्या इव धामस्तेजो यस्य एवंभूतं यत् तवाङ्गं शरीरं तस्य रुचि[1]-दीप्तिस्तया कञ्चुकितो वेष्टितः श्याम[2]पीतयोर्व्यतिकरेऽतीवशोभाकृत् प्रसिद्ध एव । क इव कया लिप्तो यथा चकास्तीत्याह । श्यामो मेचको नवनूतनकमलवन्तो जलाधिका करका क[3]र्षोपला यत्र स तथाविधः पयोदो मेघः सुमेरुशिख(ख)या कनकाचल-चूलिकया आलिङ्गितः स्पृष्टः सन् यथा चकास्ति । सुमेरोः सौवर्णत्वात् तच्छिखायाः पीतत्वं प्रसिद्धमेव । भैम्याः पुनरूपमानेन साधितं कन्दर्पमूर्धरुहेत्यादिपदानां साभिप्रायत्वं दमयन्त्यङ्गानां मार्दवादि द्योतनपरम् । गौडीयाः प्रायेण श्यामाः (-मा) एव भवन्तीति श्याम इति तत् स्वरूपनिरूपणम् । कञ्चुको जातोऽस्येति कञ्चुकितः ॥९६॥

एतेन सम्मुखमिलत्करिकुम्भमुक्ताः कौक्षेयकाभिहतिभिर्विबभुर्विमुक्ताः ।
एतद्भुजोष्मभृशनिःसहया विकीर्णाः प्रस्वेदबिन्दव इवारिनरेन्द्रलक्ष्म्या ॥९७॥

सम्मुखा मिलन्तो ये करिणस्तेषां कुम्भयोर्मुक्ताः स्थौलमौक्तिकविशेषाः, एतेन राज्ञा कौक्षेयकाभिहतिभिः खड्गाभिहननैर्विमुक्ता मोक्षिता इतस्ततो विबभुः । क इव विबभुरित्याह । एतस्य भुजौ तयोरूष्मा प्रतापस्तस्य भृशमत्यर्थं निःसहया अक्षमया अरिनरेन्द्राणां लक्ष्म्या । विकीर्णा विक्षिप्ताः प्रस्वेदबिन्दवः इवेतीयमुपमेव मम प्रतिभासते । उत्प्रेक्षांशोऽप्यत्र घटत एव । तदत्र यधुक्तं तत् सहृदयैरूपादेयम् । वाक्यस्यास्य पौर्वापर्यपर्यालोचनया करिणां सम्मुख-[२३१.७]-मिलनमस्य सङ्ग्रामभूमावेवायाति ॥९७॥

आश्चर्यमस्य ककुभामवधीनवापदाजानुगाद् भुजयुगादुदितः प्रतापः ।
व्याप्तत्सराशयविसारितसप्ततन्तुजन्मा चतुर्दश जगन्ति यशःपटश्च ॥९८॥

आश्चर्यं[4] चित्रमेतत् (-द-) अस्य नृपस्याजानुयुगाद् भुजयुगादुदित उत्पन्नः प्रतापः तेजः ककुभामवधीन् दिशामाधारनं वा यत् । आजानु जानुनी यावद् गच्छती-[5]त्याजानुगमिति । आपातमात्रेण ह्रस्वत्वमेव प्रतीयते । भुजयोर्युगं भुजयुगं तस्मात् । भुजयुगं हि स्वदूरं दूरं गन्तुमशक्तम् । तज्जनितश्च प्रतापोऽतीव तरां

1. B1. -द्री- 2. & -मः- 3. & वर्षोपला. 4. B1, & om. -ती- 5. B1. & om. -जा-

प्रलम्बो रथीयोगामीति आश्चर्यम्। कार्येण हि किं कारणानुरूपेण भवितव्यम्।

तत्त्वतस्तु भुजयोराजानुगामिता परमं दैर्घ्यम्। तच्च पुरुषेषु प्रविरलमेव यत्र च तद्भवेच्छादित्[1] (-च्छदिगन्त[1]) गामि प्रतापो भवेत्। किञ्चास्य यश एव परश्चतुर्दश सङ्ख्यानि जगन्ति भुवनानि व्यापद्वयाप व्याप्नोति स्मेति। एतदप्याश्चर्यम्। यतः कीदृशः? सदा सर्वदा कालं शयेन हस्तेन विसारिताः प्रतताः सप्तसङ्ख्याकास्तन्तवः सूत्राणि तेभ्यो जन्म यस्य स तथा। यश एव पाडो[2] (पटो[2]) वस्त्रम्। तत्त्वतस्तु सन् शोभनो य आशयश्चित्ताभिप्रायस्तेन विसारिता निरन्तरप्रवर्तिताः सप्ततन्तवो यज्ञास्तेभ्यो जन्म यस्येति, युक्तमेवैतत् ॥९८॥

औदास्यसंविदवलम्बितशून्यमुद्रामस्मिन् नृपे (दृशो) निपतितामवगम्य भैम्याः।
स्वैरेव जन्यजनताऽध्यगमत् तौ सुखं मनीङ्गितविभावनमेव वाचः ॥९९॥

जन्यजनता विमानसमूहः अस्मिन् नृपे भैम्या दृशोरौदास्यसंविदवलम्बितशून्य-मुद्रां निपतितामवलोक्य स्वेन निजबुद्ध्यैव तां भैमीमन्यं नृपमजीगमत्, गमयति स्म। सुखं दक्षं प्रति इङ्गितस्य चेष्टितस्य विभावनं प्रकटनमेव। वाचो वचनानि विदग्धश्चेष्टयैव सर्वं जानातीत्यर्थः। तथा चोक्तम्। 'उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति नोदिताः। अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः' इति। औदास्यं मध्यस्थभावस्तेन या संविदु-पलब्धिस्तेनावलम्बिता संश्रिता शून्या रिक्ता मुद्रा ग्रन्थिभेदस्ताम्[3] ॥९९॥

एतां कुमारनिपुणां पुनरप्यभाणीद्वाणी सरोजमुखि! निर्भरमारभस्व।
अस्मिन्नसंकुचितपङ्कजसख्यशिक्षानिष्णातदृष्टिपरिरम्भविजृम्भणानि ॥१००॥

वाणी भगवती कुमारनिपुणामेतां भैमीं पुनरप्यभाणीत्। किमवददित्याह। हे सरोजमुखि! अस्मिन्नृपे संकुचितानां पङ्कजानां सख्यस्य मैत्राया (-त्र्याः) शिक्षा उपदेशपरिशी-[232. a]-लनं वा तत्र निष्णाता प्रवीणा या दृष्टि-स्तस्याः परिरम्भस्य समाश्लेषस्य विजृम्भितानि समुल्लसितानि निर्भरं गाढं यथास्यात्तथा आरभस्वोपक्रमस्व साद्रमेनमवलोकयेत्यर्थः। कुमारी चासौ निपुणा च कुमारनिपुणा विज्ञा कुमारी ॥१००॥

1. B1. भवेच्छादितं गामि, D. भवेच्छदिगन्त गामि. 2. B1. पाडो, D. पटो.
3. D. -बन्धस्ताम्.

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थपृथ्वीधरः पृथुरयं मथुराधिनाथः ।
अश्मश्रुजातमनुयाति न शर्वरीशः श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥१०१॥

इयं (अयं) पृथुर्नाम मथुराया नगर्या अधिनाथो राजा । कीदृशः ? प्रत्यर्थिनः प्रतिपक्षाः पार्थिवा नृपास्तेषां पयोनिधिर्बहुत्वात् समुद्रस्तस्य माथो मथनं तत्र मन्थपृथ्वीधरो मन्दारादिः । न विद्यते श्मश्रुजातं मुखरोमलेशो यत्र तत् तथा-विधमस्य वदनाब्जं शर्वरीशश्चन्द्रो नानुयाति नानुकरोति । यतः श्यामेन कृष्णे-नाङ्केन लाञ्छनेन कर्बुरं[1] शबलं वपुर्यस्येति व्यतिरेकोऽयम् ॥१०१॥

बालेऽधरा धरितनैकविधप्रवाले ! पाणौ जगद्विजयकार्मणमस्य पश्य ।
ज्याघातजेन रिपुराजकधूमकेतुतारायमाणमुपरज्य मणिं किणेन ॥१०२॥

हे बाले ! हे [अ]धराधरितनैकविधप्रवाले ! अस्य पृथोः पाणौ वर्तमानं जगद्विजयस्य कार्मणं मूलकर्म पश्य । किं कुर्वाणम् ? ज्याघातजेन धनुर्गुणाहनन-सम्भूतेन किणेन व्रणेन मणिं सितरत्नविशेषमुपरज्योपरक्तं कृत्वा धूमकेतु-तारायमाणम् । धूमाकारः केतुर्धूमकेतुस्तस्य तारा ज्योतिस्तद्वदाचरन्तम् । ज्योतिर्वचनः केतुशब्दे वर्तमानस्तारशब्दोऽयं पुंसि । लोका अपि तारकोऽयमुदितोऽस्तीति प्रवदन्ति । जगद्विजयस्य कार्मणं नानाविधजटिकामूलमयं मणिं संयुक्तं कङ्कणं रक्षरिका नाम तादृशरीतिवशात् पृथोर्महाधनुर्धरस्य पाणौ चेदमस्ति[2] यन्मूलं पाणिमूलस्य मणिबन्धनं नाम तस्येदं वर्णनम् । मथुराप्रदेशेऽन्येऽपि बणिक्पुत्रादयः पट्टडोरकग्रन्थिनिबद्धमरकतादिमणिसनाथं बाहुरक्षकसंज्ञकं कङ्कणं बाहुमूलेऽङ्गदपदे निदधति । अधरोष्ठेन कृत्वा जितो नैकविधो द्विजा-तीयः प्रवालो यया तस्याः सम्बोधनम् । प्रवालस्य चानेकविधत्वं पल्लव-विद्रुमभेदात् ॥१०२॥

एतद्भुजारणिसमुद्भवविक्रमाग्निचिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययारिपरिषन्मशकार्थयाश्रु विश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥१०३॥

धनुर्गुणस्य किणः खलु नूनं धूमलेखैव । या किं तदाह । या एतस्य पृथोर्बाहुभुज एवारणिरग्निर्मथनकाष्ठं ततः समुत्था यस्य स तादृशो यो विक्रम एवाग्नि-स्तस्य चिह्नं लिङ्गम् । धूमलेखा ह्यरणेः समुत्थितस्याग्नेश्चिह्नम् । कथं ज्ञायते

1. ख. कलुरं · 2. ग. चेद्रुमस्ति · 3. चेदमस्ति·

धूमलेखेयम् ? । तत्र युक्त्या हेतुमाह। यथा अरिपरिषन्मशकार्थया जातं सम्पन्नम्। धूमा-[232.b]-नां [राशि:] मशकानां क्षुद्रजन्तुविशेषाणां नाशाय क्रियमाण-स्तदर्थ एव भवति। न केवलमेतदर्थमेव जातं, रिपुदारि (रा) दृगम्बुजेभ्योऽश्रु-विश्राणनाय च जातम्। सुकुमारनारीणां नलिननि (नी) लनयनेभ्यो धूमो विशिष्याश्रूणि ददत् तदर्थ एव। अरिपरिषदेव मशकास्तेभ्य इयं मशकार्थे-त्यस्वपदसमासः। अथवा अर्थशब्देनैव प्रयोजनवचनेन समासः। मशका एवार्थो यस्या इति। अत्र च मशकनिवृत्तिरेवार्थः पर्यवस्यति। रिपुदाराणां दृश एवाम्बु-जानि तेभ्यः अश्रूणां विश्राणनं दानमित्यश्रुभिः सतत संबन्धः कथितः। यद्धि यस्मै संकल्पो दीयते, तस्य तेन[1] सार्वकालिकः संबन्धो भवति। दातुः संबधा-भावात् स्वसत्तानिवृत्तिः। परसत्तापादनं दानमिति दानलक्षणात्। अरिपरिषदो मशकत्वरूपणेनातीवाकिञ्चित्करत्वं व्यञ्जयति ॥१०३॥

श्यामीकृतां मृगमदैरिव माधुरीणां धौतै:[2] कलिन्दतनयामधिमध्यदेशम्।

तत्राप्तकालियमहाह्रदनाभिशोभां रोमावलीमिव विलोकयितासि भूमे:॥१०४॥

तत्र मथुरायामधिमध्यदेशं मध्यदेशे वर्तमानां कलिन्दतनयां यमुनाम्। भूमे रोमावलीमिव विलोकयिष्यसि। रोमावली हि नायिकामध्यदेशे शरीर-स्यान्तर्भवति। अन्यमपि रोमावलीधर्ममाह। उत्प्रेक्ष्यते – धौतैः क्षालितैः माधुरीणां[3] माधुरस्त्रीणां मृगमदैः कस्तूरिकाभिरिवाश्यामा श्यामा कृता श्यामीकृता तां तथेति। प्रसिद्धं तस्याः श्यामत्वं सहजसिद्धमेवमुत्प्रेक्षितम्। पुनः कीदृशीम् ? आप्ता लब्धा कालियमहाह्रदेन नाभेः शोभा यत्र ताम्। रोमावल्याः सन्निहिता भवति नाभिः। कालियो नाम नागो यः किल भगवता कृष्णेन बाल्ये पद्मनालेन नस्तितः, क्रीडावाहनीकृतश्च तदधिष्ठितो महाह्रदः। कालियस्यैव मध्यदेशः प्रसिद्धो हिमाचलाद् दक्षिणतः कियानपि मथुरां मध्येकृत्य ॥१०४॥

गोवर्धनाचलकलापिचयप्रचारनिर्वासिताहिनि वने सुरभिप्रसूने।

तस्मिञ्जनेन सह निर्विश निर्विशङ्कं वृन्दावने वनविहारकुतूहलानि ॥१०५॥

---

1. B. देतु. 2. & धूतै:, 3. B. om. माधुरस्त्रीणां.

हे भैमि! तस्मिन् तादृशे वृन्दावने अनेन राज्ञा सह निर्विशङ्कं निर्भयं यथा स्यात्तथैव वनविहारस्योद्यानयात्रायाः कुतूहलानि बहुविधं कौतुकं निर्विश ~~भुङ्क्ष्व~~ उपभुङ्क्ष्व। कीदृशे? घने सान्द्रे तथा सुरभीणि प्रसूनानि यस्मिन्। ननु वनस्येदं विशेषणद्वयं प्रायेण भुजङ्गावस्थितिहेतुस्तत्कथं तत्र निःशङ्कं वनकेलिकौतूहलं सुलभमित्याह। गोवर्धननाम्नोऽचलस्य कलापिचयेन केकिकुलेन [233.७] निर्वासिता दूरं गमिता अहयः सर्पा यस्मात्। -दि- इत्यनेन भङ्ग्या गोवर्धनसान्निध्यं दर्शितं कलापिकुलकृतं रामणीयकं च प्रसूनानां सामान्येन सुरभित्वे सिद्धेऽपि तदुपादानमतिशयार्थम्। करवीरादेरसुरभिप्रसूनव्यवच्छेदार्थं च। सुरभेर्वसन्तस्य सर्वकालं दोहदादिबलेन प्रसूनानि यत्रेति वा व्याख्येयम्॥ १०५॥

भावी करः कररुहाङ्कुरकोरकोऽपि तद्वल्लिपल्लवचये तव सौख्यलक्ष्मः (क्ष्यः)।[1]
अन्तस्त्वदास्यहृतसारतुषारभानुशोभानुकारिकरिदन्तजकङ्कणाङ्कः॥१०६॥

भो भैमि! कररुहाङ्कुरा एव कोरकाणि यत्र स ईदृशोऽपि तव करः पाणिस्तस्य वृन्दावनस्य वल्लयस्तासां पल्लवचयस्तस्मिन् सौख्यलक्ष्यो भावी भविष्यति। करस्य पल्लवचयस्य च साम्यमस्त्येव। अथवा संशयसम्भावनात् समानत्वमायातम्। सादृश्याविशेषेऽभयकोट्यवलम्बी संशयः। विशिष्टस्य विशेषणात्त्वेकतरनिश्चयः। कोरकसद्भाव एव वा पल्लवसंशयहेतुः। नखाङ्कुराकारकदर्शनात् च साक्षाद् वल्लिपल्लव एवायमिति प्रतीतिरुचितैव। तथापि तव पाणिर्विभिन्न एव पल्लवेभ्यस्त्विद्भाविष्यते। यतः कीदृशः? अन्तर्मध्ये त्वदास्येन हृतः सारो यस्य स एवंभूतो यस्तुषारभानुश्चन्द्रस्तस्य शोभामनुकुर्वन्तीति। एवंभूतानि करिदन्तजानि कङ्कणान्यङ्कश्चिह्नं यत्रेति। तत्र किल प्रायेण हस्तिदन्तमयानि वलयानि अबलानां भूषणमिति देशस्वभावः सूचितः। कररुहा नखा एवाङ्कुराणामभिनवोद्भेदानां कोरकाणि बालदलसम्पुटा यत्रेति वा। भैम्या वल्लीभिः सादृश्यं करस्य पल्लवैर्नखानामङ्कुरकोरकैः एवं सति करिदन्तमयैर्वलयैर्विशेषोपलम्भः॥१०६॥

तज्ज्ञः श्रमाम्बु सुरतान्तमुदा नितान्तमुत्कण्टके स्तनतटे[2] तव संचरिष्णुः।
स्वच्छन्दमभञ्जनजनः पथिकः पिपासुः पाता कुरङ्गमदपङ्किलमप्यशङ्कम्॥१०७॥

तज्जो वृन्दावनसम्भूतः प्रभञ्जनजनो वायुलोकः पान्थः। कुरङ्गमदेन कस्तूरिकया कृत्वा पङ्किलं सकर्दममपि श्रमाम्बु स्वेदजलं ~~[illegible]~~ निःशङ्कं पङ्कशङ्कां त्यक्त्वा पाता पास्यति। किं करिष्णुः? । सुरतान्तमुदा सम्भोगावसानहर्षेण नितान्तमुद्गतकण्टके

---

1. ४. लक्ष्म्यः 2. B1, ४. स्तनयुगे.

तथ स्तनतटे संचरिष्णुः। किं कुर्वन्?। खञ्जन् खञ्जो भूत्वा सञ्चरणशील इत्यर्थः। किमिति पङ्किलमपि पिबन्तीत्याह। यतः पिपासुस्तृषितः। अत्र सै(शै)त्यं मान्द्यं सुरभित्वं च यथायोग्यं वायोरवगन्तव्यम्। अन्योऽपि पिपासुः। पथिकजनः क्वापि सकण्टके तटे खञ्ज-[233 b]-न् सञ्चरन् पङ्किलमपि सलिलं निःशङ्कं पिबति। स्तनयोस्तटं समीपं तटमिव काठिन्यात् उद्गताः कण्टक-रोमभेदो यत्र। पक्षे तटमेव प्रसिद्धम्। कण्टका बब्बूलाद्यवयवाः ॥१०७॥

पूजाविधौ मखभुजामुपयोगिनो ये विद्वत्कराः कमलनिर्मलकान्तिभाजः।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णैस्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥१०८॥

* हे भैमि! ये विदुषां कराः पाणयः मखभाजः यज्ञभोजिनां पूजाविधौ चरणक्षालनादौ उपयोगिनः सोपयोगाः तथा कमलवत् निर्मलकान्तिभाजः। कमलेन जलेन वा निर्मलकान्तिभाजः। ते अनेन राज्ञा वितीर्णैर्दत्तैर्हाटकैः सुवर्णैः कृत्वा लक्ष्मीं दधन्तः (तः) सन्तः, श्रियं धारयन्ति। कीदृशाः? स्फुट-वराटकगौरगर्भाः भवन्ति। हाटकगोलालङ्कृतत्वात् स्फुटवराटकवद् गौरो गर्भो येषां ते तथा। कीदृशाः? मखभुजां देवानां पूजाविधौ सपर्याविधौ उपयोगिनो उपायनभूताः पुनः कमलनिर्मलकान्तिभाजः पद्मवत् निर्मलकान्तिभाजः। कमलस्य बीजकोशो वराटकः। कमलानि च लक्ष्मीं धारयन्ति स्फुटवराटक-गौरगर्भाणि भवन्ति। मखभुजां देवानां पूजाविधावुपयोगीनि भवन्ति। विद्वत् करा अपि देवपूजायामुपयोगिनो वा ॥१०८॥

---

* B1 → विद्वत्कराः विदुषां हस्ताः, ते अनेन राज्ञा वितीर्णैर्दत्तैर्हाटकैः स्वर्णैः लक्ष्मीं दधन्तः सन्तः स्फुरद्वराटकगौरगर्भाः भवन्ति। कीदृशाः? मखभुजां देवानां पूजाविधौ सपर्याविधौ उपयोगिनो उपायनभूताः पुनः कमलनिर्मलकान्तिभाजः पद्मवत् निर्मलकान्तिभाजः। स्फुटवराटकवद् गौरो गर्भो येषां ते तथा।

* D. हे भैमि! ये विदुषां कराः पाणयः मखभाजः यज्ञभोजिनां पूजाविधौ चरणक्षालनादौ उपयोगिनः सोपयोगाः तथा कमलवत् निर्मलकान्तिभाजः। कमलेन जलेन वा निर्मलकान्तिभाजः। ते अनेन राज्ञा वितीर्णैर्दत्तैर्हाटकैः सुवर्णैः कृत्वा लक्ष्मीं दधते, श्रियं धारयन्ति। कीदृशाः? हाटकगोलालङ्कृतत्वात् स्फुटवराटकवद् गौरो गर्भो येषां ते तथा। D. om. सन्तः स्फुटवराटक----पद्मवत् निर्मलकान्तिभाजः।

वैरिश्रियः[1] प्रति नियुद्धमनाप्नुवन्यः[2] किञ्चिन्न तृप्यति धरावलयैकवीरः ।
स त्वामवाप्य निपतन्[3]मदनेषुवृन्दस्यन्दीनि तृप्यतु मधूनि पिबन्निवायम् ॥१०९॥

योऽयं धरायामेकोऽद्वितीयो वीरः सुभटः वैरिश्रियः सकाशात् प्रतिनियुद्धं प्रती(ति)चापं बाहुयुद्धमनाप्नुवन् सन् किञ्चिन्मनागपि न तृप्यति । सोऽयं त्वामवाप्य तृप्यतु । उत्प्रेक्ष्यन्ते (ते) । निपतन्ता मदनेषूणां वृन्दात् स्यन्दीनि मधूनि पिबन्निव । मदनेषवश्च कुसुमानि तत्र मकरन्दसंज्ञकं मधु विद्यत एव ॥१०९॥

तस्मादियं क्षितिपतिक्रमगम्यमानमध्वानमैक्षत, नृपादवतारिताक्षी ।
तद्भावबोधबुधतां निजचेष्टयैव व्याचक्षते स्म शिबिकानयने नियुक्ताः ॥११०॥

इयं भैमी तस्मात् नृपादवतारिताक्षी सती, क्षितिपतिक्रमेण गम्यमानं गमन-क्रियया धा(यो)प्यमानं पन्थानमवैक्षत । अथ शिबिकानयने नियुक्ताः पुरुषा-स्तद्भावबोधबुधतां भैम्याशयज्ञतां निजचेष्टयैव कृत्वा व्याचक्षते स्म, व्याख्यातवन्तः ते(-न्तस्ते) तत्स्खलिता इत्यर्थः ॥११०॥

भूयोऽपि भूपमपरं प्रति भारती तां त्रस्यच्चमूरुचलचक्षुषमाचचक्षे ।
एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मीमक्ष्णोः मुदं[4] जनय, खञ्जनमञ्जुनेत्रे ! ॥१११॥

भारती भगवती पुनरपि तां भैमीं त्रस्यच्चमूरोर्मृगस्येव चक्षुषी यस्या इति तां तथाविधां भैमीमाचचक्षे । किमाचष्ट तदाह — खञ्जनवन्मञ्जुनी मनोज्ञे नेत्रे यस्यास्तस्याः संबोधनं — हे खञ्जनमञ्जुनेत्रे ! एतस्य काशि-[234.a]-नृपते-र्लक्ष्मीं शोभामवेक्ष्याक्ष्णोर्मुदं जनय, प्रीतिमुत्पादयेति ॥१११॥

एतस्य सावनिभुजः कुलराजधानी काशीभवोत्तरणधर्मतरिः स्मरारेः ।
यामागता दुरितपूरितचेतसोऽपि पापं निरस्य चिरजं विरजीभवन्ति ॥११२॥

सा कासी(शी) वाराणसी एतस्यावनिभुजो राज्ञः कुलस्यान्वयस्य राजधानी नृपतिवासयोग्या नगरी । या किमित्याह । या स्मरारेर्भगवतो विश्वनाथस्य भवोत्तरणाय संसारपारगमनाय धर्मप्रधाना शुल्करहिता तरिः नौः । तरिनिर्देशाद् भवस्य तरणीयत्वमायातम् । तच्च तरणीयमत्र भवस्य दुस्तरत्वात् समुद्र एव । सा केत्याह । दुरितपूरितचेतसोऽपि पुरुषा यां कासी(शी)मागताः सन्तश्चिरजं बहुकालसंचितं पापं निरस्य निर्धूय विरजीभवन्ति गुणत्रयातीता सम्पद्यन्ते ।

1. ४ —श्रियं. 2. ४ —वल्यः. 3. ४. नियतन्. 4. ४. मुखं., B1. सुखं.

विगतं रजो येषां ते विरजसः; अविरजसो विरजसो भवन्तीति विरजीभवन्ति।
अरुर्मनश्चक्षुश्चेतो रजो रहोभ्यः कृतसलोपेभ्य एवार्थं विधिः इति च्विप्रत्ययः
सलोपश्च। च्वौ चेतीत्वम्। विरजसः सात्त्विका वा ॥११२॥

[1] आलोक्य भाविविधिकर्तृकलोकसृष्टिकष्टानि रोदिति पुरा कृपयैव रुद्रः।
[2] नामेच्छयेति मिषमात्रमधत्त यत्तां संसारतारणतरीमसृजत् पुरीं सः ॥११३॥

रुद्रो भगवान् कृपयैव पुरा रोदिति, रोदिति स्म। किं कृत्वा? विधिः कर्ता यस्याः सा विधिकर्तृका, सा चासौ लोकानां सृष्टिभाविनी चासौ लोकसृष्टिश्च, तस्याः कष्टानि नानाविधानि दुःखान्यालोक्य सम्भाव्य। ननु भगवान् किल स्वेच्छयैव रोदिति स्मेत्याह। आत्मेच्छयेति मिषमात्रं नाधत्त। अपि तु निजेच्छयैव करोतीति मिषमात्रमधत्तेति प्रतिज्ञा। नन्वत्र को हेतुरित्याह। यत्कारणात् स भगवान् तां संसारतारणतरीं काशीं (पुरी)मसृजत्। तारयतीति तरणी, संसारस्य तारणी संसारतारणी, संसारस्य तारणे परपारप्रापणे वा तरी। नामेच्छयेति मिषमात्र-मधत्तेति पाठो युक्तः। वैदेहिनाम्न इच्छया करोतीत्युक्तमस्ति। को नामाहमस्मि, को मे नाम करोतीति हि श्रुतिः। पिता हि नाम करोति। तस्य च स्वयंभुवः पितुरभावात् को नाम करोतु। अत एव नामेच्छया करोद ॥११३॥

वाराणसी निविशते न वसुन्धरायां तत्र स्थितिर्मखभुजां भुवने निवासः।
तत् तीर्थमुक्तवपुषामत एव मुक्तिः स्वर्गात् परं पदमुदेतु मुदे तु कीदृक् ॥११४॥

वाराणसी वसुन्धरायां न निविशते, न संतिष्ठति। अपि तु काश्यां निवेशो भूमेर्बहिः स्वर्गवत् स्वर्ग एव वा। इत्यागमे प्रसिद्धम्। अतस्तत्र वाराणस्यां [२३४-६] स्थितिः साक्षात् स्वर्ग [3] एवेत्युच्यते। अत एव तत्(त)स्या तीर्थेषु स्थान-विशेषेषु मुक्तवपुषां त्यक्तदेहानां मुक्तिः। तु यस्मात् स्वर्गात् परमुत्कृष्टम्। उपरिवर्ति किं पदं मुदे प्रीत्यै उदेतु जयतु भौ(भू)मौ [4] सत् तीर्थेषु मुक्तदेहानां परमसुखदायिनी स्वलूर्ध्वगतिः स्वर्गः। स्वर्गो सत्तीर्थः। मुक्तदेहानां त्यायत एव मुक्तिरिति। सैव तीर्थं तत्तीर्थमिति वा। तीर्यतेऽनेनास्मिन् इति वा तीर्थम्। 'तीर्थमृषिजुष्टे जले गुरौ' ॥११४॥

1. D, B. आलोच्य. 2. D. नामेच्छयेति. 3. B. एवेत्युच्यते, D. एवन्त्युच्यते.
4. B. तत.

सायुज्यमृच्छति भवस्य भवाब्धियादस्तां पत्युरेत्य नगरीं नगराजपुत्र्याः ।
भूताभिधानपटुमद्यतनीमवाप्य भीमोद्भवे ! भवतिभावमिवास्ति धातुः ॥११५॥

भो भै (भी) मोद्भवे ! भव एवाब्धिस्तस्य यादो जलजन्तुर्देही तां नगराजपुत्र्या विशालाक्ष्याः पत्युर्विश्वनाथस्य तां नगरीं वाराणसीमेत्य भवस्य भगवतः सायुज्यं समानयोगमृच्छति । स एव भवतीत्यर्थः । क इव कां प्राप्येत्याह । भूतकालस्याभिधानेऽतीत--कालस्योक्तौ पटुं दक्षामद्यतनीं नामविभक्तिमवाप्य । अस्तिधातुर्भूभावं भूधातुत्वमिव । अद्यतन्यामसार्वधातुकत्वात् । अस्तेर्भूरादेशो भवति । तथा वाराणसीं प्राप्य देही शिव एव भवति ॥ ११५॥

निर्विश्य निर्विरति कासि (शि) निवासि भोगं निर्माय नर्म च मिथो मिथुनं यथेच्छम् ।
गौरीगिरीशघटनाधिकमेकभावं शर्मोर्मिकञ्चुकितमञ्चति पञ्चतायाम् ॥११६॥

मिथुनं द्वन्द्वं कर्तृ पञ्चतायां कालधर्मे सति । एकभावमेकत्वमञ्चति । कीदृशम् ? शर्मोर्मिकञ्चुकितं सुखलहरीभिः वेष्टितम् । एकीभूय निरतिशयमुक्तिसुखमनुभवतीत्यर्थः । पुनः कीदृशम् ? गौरीगिरीशयोर्घटना संयोगस्ततोऽप्यधिकम् । किं कृत्वा ? निर्वृत्तिविरतिरहितं यथा स्यादेवं कासि (शि) निवासिनां स्वर्गभूमिनिविष्टवाराणसीनिवासशी(शी)लानां भोगं विषयजं सुखं निर्विश्योपयु (भु) ज्य यथेष्टमिष्टस्यानतिक्रमेण मिथः परस्परम् । नर्म परिहासं च निर्माय । अन्यत्र ह्येतद् ~~द्वयं~~ द्वयं त्यक्तवतामेव मुक्तिः । हास्यक्रीडासुखं नर्म । तस्य भोगेष्वन्तर्भावेऽपि अङ्गानि भावेन स्वरूपमात्रप्रतिपादनाय पृथगुपादानम् ॥११६॥

न श्रद्दधासि यदि तन्मम मौनमस्तु कथ्या निजाप्ततमयैव तवानुभूत्या ।
न स्यात् कनीयसितरा यदि नाम कास्याः (श्याः) राजवन्ती (-न्वती) मुदिरमण्डनधन्वना भूः ॥ ११७॥

हे भैमि ! यदि त्वं न श्रद्दधासि, न सम्प्रत्ययं करोषि, तर्हि मम मौनमस्तु । नाहं वक्ष्यामि निजा चात्मावाप्ततमा च निजाप्ततमास्तस्याभि हिता तया तवानुभूत्या प्रत्यक्षोपलब्ध्या कथनीया । अनुभव एव तव कथयिष्यति । अनु-[235.a]-भवात् प्रत्यक्षप्रमाणात् चान्यो हिततमो नास्ति । अनुमानागमाभ्यां प्रत्यक्षस्य बलीयस्त्वं प्रसिद्धमेव । किं तदित्याह । मुदिरमण्डनधन्वना इन्द्रेण कृत्वा राजन्वती सुस्वामिका भूः स्वर्गलक्षणा । नाम प्रकाशं कास्याः सकाशात् कनीयसितरा प्रकृष्टा कनीयसी यदि न स्यात् । इन्द्रेण पाल्यमाना धौरनेन राज्ञा पाल्यमानाया कास्या (श्या) दूरं हीयतेतरामत्यहं प्रतिजानीते वर्ते । यदि त्वं मम वचसि न प्रत्येषि, तर्हि प्रत्यक्ष एव

दृश्यसीत्यर्थः। लोकोक्तेरेव भङ्गिरेषा। मुदिरा मेघास्तेषां मण्डनं धन्व धनुर्यस्येति तेन। एतेनैतस्यापि राज्ञः प्रशस्यधनुःसंबन्धः सूचितो यद्वसे (शे)न विधिवत् काशीं पालयन् जागर्ति। सुरा देहे राजन्वान्, भूश्च राजन्वती ॥११७॥

ज्ञानाधिकासि सुकृतान्यधिकाशि कुर्याः कार्यं किमन्यकथनैरपि यत्र मृत्योः।
एकं य (ज)नाय सततभयदानमन्यद्धन्ये! नहत्यमृतसत्रमवारितार्थि ॥११८॥

हे भैमि! असि त्वं ज्ञानेनाधिका। तस्या अधिकाश्यां मृत्योरपि जनाय सामान्यलोका-
-याभयदानं वहति निरन्तरं प्रवर्तते। अभयदानात् चान्यत् सुकृतं नास्ति। तच्च
मोक्षदानात् सिद्धमेव। अन्येषां वार्तैव क्व? मृत्योर्दुर्जेयादपीत्यर्थः।[1] हे धन्ये! सुकृतानि
-दं- -यं-
अन्यत् द्वितीयममृतस्य सत्र मन्नदानयज्ञो वहति। परमवारिता अर्थिनो यत्र तत् तथा।
अवारि सूत्रागारमित्यर्थः। एतेन प्राणदानं सततमिहेति सूचितम्। अन्नं हि प्राणास्तस्मा-
-ण-
-दन्नदः प्राणद एवामृतममृतमिव सिद्धान्नमयाचितं चामृतम्। तत्र हि प्रायेण सुकृति-
2 -भिरयाचितमेव ति(भि)क्षुभ्यः सिद्धमन्नं सत्कृत्य दीयते। तच्चतस्तु अमृतं जलं
-कृ-
3 तस्य सत्रं गङ्गा वहति सर्वसामान्या। वाराणस्यां विशेषज्ञैरन्नदानं प्रशस्यते। अतः
सुकृतिनस्तत्र तद्विशेषेण कुर्वन्तो (ते) ॥११८॥

(-र्तेः)
भूभर्तुरस्य रतिरेधि मृगाक्षि! मूर्ता सोऽयं तवास्तु कुसुमायुध एव मूर्तिः।
भातं च ताविव पुरा गिरिशं विराद्धुमाराद्धुमाशु पुरि तत्र कृतावतारौ ॥११९॥

हे मृगाक्षि! त्वमस्य भूभर्तुः मूर्ता रतिरेधि भव। सोऽयं भूभर्ता तव मूर्तः
कुसुमायुधः काम एवास्तु। पुरा पूर्वं गिरिशं विराद्धुं प्रकोपितुमाशु शीघ्रमाराधयितुं
प्रसादयितुं तत्र पुरि काश्यां (श्यौ) कृतावतारौ लब्धजन्मानौ ताविव रतिकुसुमायुधा-
-विव युवां भातं च शोभेतां च ॥११९॥

कामानुशासनशते सुतरामधीती सोऽयं रहो नखपदैर्महतु स्तनौ ते।
4 रुष्यादृश्याचरणकुङ्कुमपङ्करागसङ्कीर्णशङ्करशशाङ्ककलाङ्ककारैः ॥१२०॥

सोऽयं राजा कामानुशासनानां कामशास्त्राणां वात्स्यायनप्रभृ-[ङ्३५.६]-तीनां शतानि,
तेषु सुतरामधीती प्रवीणो रह एकान्ते नखपदैः करजव्रणैः कृत्वा तव स्तनौ महतु
पूजयतु। कीदृशैः? सरसत्वात् कुचकुङ्कुमपङ्कसम्पर्काद् वा। रुष्टाया अद्रिजायाश्चरणस्य
कुङ्कुमपङ्करागेण सङ्कीर्णा मिलिता या शङ्करशशाङ्कस्य कला लेखा, तस्या अङ्कारा

1-Bl. om. हे धन्ये ---- सूत्रागारमित्यर्थः। 2. Bl, Ø. -तामव. 3. Bl. सन् तस्य, Ø. तस° तस्य.
4. Bl. कुप्य- Ø. तुष्य- .

बाहुयोधिन इति लक्षणया तस्याः सु(स)दृशैरित्यर्थः। अयं च व्यतिकरो भगवद्-
-भवचन्द्रकलाधाः प्रासादनावसरे कुङ्कुमलिप्तस्य गौरीचरणस्य शिरसि निधाना-
-द्रोषावसर एव तथा तस्य तेन तादृशेन शिरसि प्रहृतत्वात्। अङ्ककारो बाहुयोधी
मल्लः। तस्य च प्रतिमल्लस्सादृश एव भवति ॥१२०॥

पृथ्वीश एव नुदतु त्वदनङ्गतापमालिङ्ग्य कीर्तिचयचामरचारुचापः।
सङ्ग्रामसङ्गतविरोधिशिरोधिदण्डखण्डिक्षुरप्रसरसम्प्रसरत्प्रतापः ॥१२१॥

एष पृथ्वीशस्त्वदनङ्गतापं नुदत्वपनयतु। किं कृत्वा? आलिङ्ग्य। अर्थात् त्वाम्।
अनङ्गस्य तापोऽनङ्गतापस्तवानङ्गतापस्त्वदनङ्गतापः। कीदृश इति विशेषणद्वयेन
भङ्ग्या कीर्तिप्रतापौ वर्णयति। कीर्तिचय एव चामरं, तेन चारुश्चापो यस्या अर्थात्
सङ्ग्रामे धनुषि च शूराणां चामरं भवत्येव। पुनः कीदृशः? सङ्ग्रामे सङ्गतानां
विरोधिनां शिरोधिदण्डस्य ग्रीवानालस्य खण्डिनो ये क्षुरप्रा नाम शरास्तैः
कृत्वा सम्प्रसरन् प्रतापो यस्य स तथा। पदवर्णमैत्री निकटस्था दूरस्था चात्र ॥१२१॥

वक्षस्त्वदग्र्यविरहादपि नास्य (वि)दीर्णं वज्रायते पतनकुण्ठितशत्रुशस्त्रम्।
तत्कन्दकन्दलतया भुजयोर्न तेजो वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥१२२॥

एतद् वक्षो वज्रायते वज्रवदाचरतीति प्रतिज्ञा। अत्र हेतुद्वयम्। यतस्तव वियोगादपि
नावदीर्णं इन्दुसेन विरहेणास्य विदीरणं युक्तम्। यस्मात् च तन्न जातं, तस्माद्
वज्रमयमेतत्। किञ्च। पतनेन लग्नेन कुण्ठितानि भग्नधाराणि शत्रूणां शस्त्राणि।
यत्र येन यस्माद् वेत्येतदपि वज्रत्वे हेतुः। हेत्वन्तरमपि भङ्ग्या दर्शयति। स एव कन्द-
-स्तत्कन्दस्तस्य कन्दले तयोर्भावस्तत्कन्दकन्दलता, तया कृत्वा। भुजयोस्तेजो वह्निः
प्रतापानलः। अरिवधूनां नयनाम्बुना शैत्यजलेनापि न नमति मन्दीभवति। अपि तु
ते (स) धगधगिति भूयो देदीप्यते। एतच्च वज्राग्नेर्लक्षणम्। स हि यथा यथा तोय-
-घटैः प्रसिच्यते, तथा तथा प्रत्युत सम्प्रदीप्यते। भुजौ वक्षःकन्दस्य कन्दले। तच्च
वज्रमयम्। तत्प्रभवौ भुजावपि तज्जं, तत्प्रभवस्तेजो वह्निः परम्परया वज्रमेव। कन्दलं
सकिसलयं सर्षपाद्यङ्कुर(र)प्रकाण्डं तत्सदृशमन्यदपि कन्दलं कन्दलत्वे-[236 a] न
रूपणाद् भुजयोः सुकुमारत्वं भवतु। परं तद् वज्रमेव निशानमेव कन्दलाति (नि)
गृह्णातीति कन्दलम्। तद्धुत्याधमानं रूत्कन्देन सार्धमुत्पाद इति ॥१२२॥

किं न द्रुमा जगति जाग्रति लक्ष्य(क्ष)सङ्ख्यास्तुल्योपनीतपिककाकफलोपभोगाः।
स्तुत्यस्तु कल्पविटपी फलसम्प्रदानं कुर्वत्स एव विबुधानमृतैकवृत्तीन् ॥१२३॥

भो भूमि! जगति द्रुमा लक्ष्य(क्ष)सङ्ख्या किं न जाग्रति। अपि तु के जानाति कियन्तो बहुजातीयास्तरवो विश्वे न सन्ति। कीदृशाः? तुल्यं समतया उपनीत उपहृतः। पिककाकयोः फलोपभोगो यैः ते तथा। येषां फलोपभोगानि (न) कोकिलकाकौ ना नाम विशेषेणोपकुर्वन्ति। तु पुनः स एव कल्पविटपी कल्पवृक्ष एव श्लाघ्यः प्रशंसार्हः। किं कुर्वन्? अमृतैकवृत्तीन् सुधैकभोजनान्। विबुधान् देवानां फलानां नानाविधानां सम्प्रदानं दानपात्रं कुर्वन्। धिक् तान् शाखिनश्चैतन्यशून्यान् ये समतया परपुष्टारिष्टयोः फलैरुपकुर्वन्ति। धन्योऽयमुद्भिज्जातीयोऽपि कल्पमहीरुहो यस्य फलानि विधिनोपढौकितानि अमृतमनाधृ(दृ)त्य नित्यमेव देववृन्दान्युपयु(भु)ञ्जते। अथ च समासोक्तिभङ्ग्याऽस्यैव राज्ञो वर्णनम्। तथा च द्रुमा इव द्रुमा राजानः, पिका इव पिका गुणिनः। काका इव काका निर्गुणाः फलं राज्यादिलाभस्तदुपयोगस्तेषामुभयेषां समतया निर्विवेकत्वात्। कल्पविटपीव कल्पविटपी फलस्य निजभुजबलार्जितनाना-विधवित्तस्य सम्प्रदानं पूजानुग्रहकाम्यया दानपात्रम्। विबुधान् पण्डितान् अमृतेना-याचितेन वृत्तिर्वर्तनं येषां तान्। अन्येषामपि दानेन चार्थं दयितेन त्वेषां विबुधानां समतया समधिकविवेकसान्निध्यात्। लक्षं सङ्ख्या येषां ते लक्षसङ्ख्याः। अमृतं स्यादयाचितम्। 'वृत्तिर्वर्तनजीवने' ॥१२३॥

अस्मै करं प्रवितरन्तु नृपा न कस्मादस्यैव तत्र यदभूत्प्रतिभूः कृपाणः।
दैवाधिदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय ॥१२४॥

नृपा राजानः अस्मै नृपाय करं बलिं कस्मात् न प्रवितरन्तु? यत्कारणादस्यैव कृपाणः खड्गस्तस्यार्थे प्रतिभूर्भूत् लग्नको जातः। दैवयोगात् ते नृपा यदि च न वितरन्ति। अर्थात् करं तदैव निजकृपाणकरग्रहाय नेदंकृपा। अस्य कृपा इदंकृपा, निजात् कृपाणात् करस्य बले ग्रहः। यदा ते कथञ्चिन्न ददति, तदा लग्नकत्वात् निजकृपाणात् करं बलिम्। कृपां त्यक्त्वा गृह्णातीत्यर्थः। तत्त्वतस्तु निजस्य कृपाणस्य करे ग्रहो ग्रहणं यदैव ते करदाने दैवात् शिथिलीभवन्ति। तदैवायं निर्दयो भूत्वा कृपा-[236-b]-णं पाणिना गृहीत्वा बलेन गृह्णातीत्यर्थः ॥१२४॥

एतद्बलैः क्षणिकतामपि भूखुराग्रस्पर्शायुषां रयवशा(शा)दसमापयद्भिः।
दध्येऽथ केवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥१२५॥

एतस्य बलान्येतद्बलानि तैरेतद्बलैरस्य राज्ञः सैन्यरूपैर्वाहैरश्वैः। सहस्रदृगिन्द्र-
-स्तस्यार्वा अश्वस्तस्योच्चैःश्रवसो गर्वोऽलुप्यत। कीदृशैः? दध्येऽथो दृश्यः केवल
एको नभसि एव क्रमस्योत्कालस्य प्रवाहः प्रवहणं निर्गमनं येषाम्। अत एवोच्चैः-
-श्रवसो गर्वस्य लोपः। स खलु खेचरः। एतेऽपि खेचराः। अन्योऽपि प्रवाहो
जलादेः पीयते। किं कुर्वद्भिः? रयवशाद् वेगपारतन्त्र्याद् भुवः खुराग्रेण यः स्पर्शः
तस्यायुंषि तेषां क्षणिकतामप्यसमापयद्भिः क्षणमात्रमपि वेगवशेन भुवं न स्पृश-
-द्भिरित्यर्थः। एतेनावस्कन्दादावपि विजयसामर्थ्यं प्रदर्शितम् ॥१२५॥

तद्वर्णनासमय एव समेतलोकशोभावलोकनपरा तमसौ निरासे।
भैमी तया गुणविदा यदनादृतोऽसौ तद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥१२६॥

तस्य राज्ञो वर्णनासमये प्रशंसावसर एव समेतस्य सङ्गतस्य लोकस्य शोभाया
अवलोकनपरा दर्शनैकनिष्ठा सती असौ भैमी तं राजानं निरासे निरस्यते स्म।
असौ भैमी राजा तया गुणविदा गुणज्ञया यदनादृतो यस्मादवगणितस्तत्कारणाद्
भूभृतां राज्ञां सदसि सभायां मम्लौ विच्छायो जातः। उत्प्रेक्ष्यते। उत्तजहेतुत्वाद्
दुर्यशसेव म्लानिं प्राप ॥१२६॥

सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्द्विष्टभाज-
-श्चित्तेनाशाजुषस्तान्समममसमगुणाममुञ्चती गूढभावा।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः ॥१२७॥

सा भैमी उपनिषदुपमा आसीत्। उपनिषदा वेदरहस्यभूतया उपमा साम्यं यस्याः
सा। अथ वा उपनिषदेव उपमा उपमानं यस्याः सा। इदानीं श्लेषमुखेन द्वयोः
साम्यं कृत्वा सा उपनिषदुपमाऽऽसीदित्याह। एक(का)मद्वितीयां वाचां पारे पारे-
-वाक् तत्र वर्तते इत्येवं शीलं रूपं यस्य तमवर्णनीयरामणीयकं कञ्चिच्चैतन्यं परमं
ज्ञानं तस्याम्भोधिं ज्ञानवन्तं निःसीम आनन्दो यस्मात् तं पुरुषमर्थान्नलम्।
अनुलक्षीकृत्य नले विषये भूयोऽतिशयेन तत्परीभूय तन्निष्ठा भूत्वा नलैकगतान्तः-
-करणा भूत्वेत्यर्थः। कीदृशी? शुभाङ्गी चारु(दे)हा। पुनः कीदृशी? गूढभावा

गूप्तचिन्ताभिप्राया। किं कुर्वती? तेजसः सख(खा) यस्तेजःसखा तेजस्विनो निखिलान्मरुतो [१३७.a] देवान् पार्थिवान् नृपान् तानसङ्ख्यातान् चित्तेन मनसा। आशाजुषः सस्पृहा-नसमगुणान् सर्वोत्कृष्टगुणान् दिष्टभाजः शुभदैवयुक्तान् भैमीप्राप्तये दैवशरणा या आप्य लब्ध्वा सममेककालं मुञ्चती त्यजन्ती। यथा- उपनिषत्पुरुषमनु परमात्मानं प्रति भूयोऽति-शयेन तत्परीभवति। उपनिषद्धि परमात्मैकनिष्ठा। पुरुषं कीदृशीम्? पारेवाग्वर्तिरूपं रूपातीतम्। न हि परमात्मनो रूपं वचनगोचरं शून्यरूपत्वात् चिदम्भोधिम् चैतन्यरूपमेकमद्वितीयं निःसीमानन्दमानन्दमयं गूढभावा गुप्तपरमार्था। किं कुर्वती? सममेककालं मुञ्चती। कान्? अपां विकारा आप्याः तेजसः सख्या(खा) यस्तेजःसखा निखिलाः समग्रा मरुतो वायु-विकाराः पार्थिवा पृथ्वीविकारान् तान्
-संस्थान -न-
सानन्तानन्तेनाकाशेन सहितान् असमगुणान् न समा गुणाः शब्दादयो येषां तान्। दिष्टभाजो दिष्टस्य कर्तृपुरुषस्याधीनान्नाशं विनाशं जुषं(-षन्ते)स्ते नाशजुषस्तान् सर्वान्। सममेककालं चित्ते मनसि त्यजन्ती। उपनिषद्भगवती एवंभूतान्यंच(-भूतानन्यांश्च) भूतविकारान् विहाय परमात्मन्येव तत्परा वर्तत इत्यर्थः। साऽपि शुभाङ्गा शुभान्यङ्गानि शिष्या(क्षा)प्रभृतीनि तत्प्रतिबोधहेतुभूतानि च शास्त्राणि यस्याः सा शुभाङ्गा। एतत्प्रपञ्चस्त्वत्राप्रस्तुत इत्यसौ यथावत् तत् प्रतिपादकेभ्यः शास्त्रेभ्यो ज्ञाउयः। शुभमङ्गं देहो यस्याः सा शुभाङ्गा। यथा शुभशरीरा शुभान्यङ्गान्यवयवा यस्येति समासे शुभाङ्गीति स्यात्। तदा उपनिषदा सार्धं साम्यं न भवेत्। उपनिषद्धि शुभाङ्गेत्येव स्यात् प्राण्यङ्गाच्चोपसर्जनादित्यस्य विषयाभावाच्चार्वा(र्व)ङ्गी मृद्वङ्गीत्यादिवत् शुभाङ्गी-त्यपि युक्तम्। तच्च सहृदयैर्विमृश्यम्। पारेवागिति। वाचां पारे पारेवागित्यव्ययीभावः॥१२७॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषु(षु)वे जितेन्द्रियचयं मामल्लदेवी च यम्।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
-काव्येऽस्मिन्निषधेश्वरस्य चरिते सर्गो निसर्गोज्ज्वलः॥१२८॥

शृङ्गारो रस एवामृतं तस्य शीतगुश्चन्द्र इति शुभम् ॥१२८॥

शाण्डिल्यनाममुनिवंशकरीरकस्य, श्रीधीरधीरतनयस्य गदाधरस्य।
कृप्तौ सुधानधुनि नैषधटीकिकायामेकादशोऽयमिति सर्ग इह प्रपूर्णः॥